# KERALA READER
# SANSKRIT

(*Academic & Sanskrit Schools*)

**STANDARD X**

PRICE : Rs. 1·25

1966

T 38
K 45

This Book Has Been
Donated By
Fr. A. Thanninppana

# संस्कृतपाठावलिः

(षष्ठी)

DHARMARAM PONTIFICAL INSTITUTE
LIBRARY
BANGALORE.

Price: Rs. 1·25

१९६६

D. P. I. LIBRARY
Acc. No. 10036
Call No. T38/K45

# PLEDGE

India is my country, all Indians are my brothers and sisters.

I love my country, and I am proud of its rich and varied heritage. I shall always strive to be worthy of it.

I shall give my parents, teachers and all elders respect and treat every one with courtesy. I shall be kind to animals.

To my country and my people, I pledge my devotion. In their well-being and prosperity alone lies my happiness.

---

©
THE GOVERNMENT OF KERALA
1966

# अवतारिका

केरलेषु भारतसंस्काराकरभूतायाः अमृतभारत्याः प्रचाराय, तत्पिपठिषूणां सौकर्यार्थं च संस्कृतविद्यालयाः प्रचाल्यन्ते किल। तथा आङ्गलविद्यालयेष्वपि संस्कृतपाठे सौकरीं पुरस्कृत्य प्रथमभाषायाः प्रथमविभागे (A group) ऐच्छिकविषयतया संस्कृतभाषाया अपि स्थानं कल्पितमास्ते ॥

द्विविधेष्वप्येषु विद्यालयेषु संस्कृतभाषायाः अध्ययनार्थं दशमकक्ष्यास्थविद्यार्थिन उद्दिश्य निबद्धमिदं पुस्तकम् ॥

कक्ष्यायामेतस्यां पाठार्थमधिकारिभिः सम्यग् विचिन्त्य निर्णीतं पाठक्रमं विषयाणां नियमं निर्देशांश्च अनुसृत्य यथाशक्ति यथामति च पुस्तकस्यास्य निर्माणे प्रयत्नः कृत इति प्रथमं प्रस्तूयते ॥

पुस्तकेऽस्मिन्, महाकविकालिदासकृतात् कुमारसम्भवाद् ब्रह्मचारिरूपस्य शिवस्य श्रीपार्वत्याश्च सम्भाषणमुद्धृतं विद्यार्थिनां हृद्यं भवेदिति विश्वस्यते। तथा श्रीवाल्मीकिरामायणान्महाभारताच्च उद्धृताः त्रयस्त्रिंकाः सर्गा अध्यायाश्च संयोजिताः पुरातनकवितावैचित्र्यबोधनार्थमुपकुर्युरिति सम्भाव्यते ॥

एवं प्राचीनानां नवीनानां च ग्रन्थकाराणां गद्यस्य रीतेरन्तरं ग्रहीतुं "महाभारतात्" "कादम्बरी"तो "दशकुमारचरिता"च्च

केचन भागाः समुद्धृताः। नाटकरससंवेदनाय "अभिज्ञान-शाकुन्तलाद्" "वेणीसंहारा"च्च रुचिकरौ लघीयसौ भागौ समुदहारिषाताम् ॥

इतरेऽपि त्रयः पाठाः विद्यार्थिभ्यो रुच्या एव भवेयुरिति मनसि कृत्वा संयोजिताः। विविधेभ्यो महतां ग्रन्थेभ्यः सुभाषितानि च समुद्धृत्य लिखितानि। अपि च समुद्धृतानां पाठानाम् औचित्य-हानिर्यथा न स्यात्तथा समाहाराश्च कृतः। एतेषां सर्वेषामपि विज्ञेय विषयानुबन्धश्च, लघीयान् निरमायि। परिशोधकानां निर्देशाननुसृत्या-त्यावश्यकाः परिष्काराः कृताः। तत्तद्ग्रन्थेभ्यः समुद्धृतानां भागानां प्रकरणादिकं च निर्दिष्टं वर्तते ॥

---

## विषयाः


| पाठः | | पृष्ठः |
|---|---|---|
| १. | ब्रह्मचारिप्रवेशः । | 1 |
| २. | सीतासमाश्वासनम् । | 35 |
| ३. | दमयन्तीबाहुकयोर्वार्तालापः । | 42 |
| ४. | इन्द्रजालप्रयोगः । | 50 |
| ५. | उपमन्योर्गुरुभक्तिः । | 55 |
| ६. | मातलिप्रवेशः । | 59 |
| ७. | उपहारवर्मलाभः । | 65 |
| ८. | शुकनासोपदेशसारः । | 70 |
| ९. | अमृतमथनम् । | 77 |
| १०. | अनसूया सीतासंवादः । | 83 |
| ११. | विश्वामित्रस्य वसिष्ठात् पराभवः । | 89 |
| १२. | भगवतो भक्तबन्धुता | 96 |
| १३. | श्रीनारायणभट्टः । | 102 |
| १४. | उत्तङ्कस्य गुरुदक्षिणा । | 106 |
| १५. | कर्णाश्वत्थामविवादः । | 114 |
| १६. | पादुकापट्टाभिषेकः । | 119 |
| १७. | किं गृहिणः प्रियाय दारगुणाः । | 124 |
| सुभाषितानि । | | 128 |
| अनुबन्धः । | | 132 |


61/420—2.

## प्रथमः पाठः

# ब्रह्मचारिप्रवेशः ।

### कुमारसम्भवम् ।

[मदनदहनेन भग्नमनोरथा श्रीपार्वती हरं वरं लब्धुं गत्यन्तराभावाद् गुरोरनुज्ञया हिमवच्छिखरे तपश्चकार । तपसः परां काष्ठां गतायास्तस्या मनसः स्वविषयभावैकरसतां परीक्ष्य तामनुजिघृक्षुः श्रीपरमशिवो ब्रह्मचारिवेषेण पार्वत्याश्रमं विवेशेत्याह—]

(१)

अथाजिनाषाढधरः प्रगल्भवाग्
ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥

**अथेति** ॥ अथानन्तरमजिनं कृष्णमृगत्वक् । आषाढः प्रयोजनमस्येत्याषाढः पालाशदण्डः । "पालाशो दण्ड आषाढः" इत्यमरः । "विशाखाषाढादण्मन्थदण्डयोः" इत्यण्प्रत्ययः । तयोर्धरस्तथोक्तः । प्रगल्भवाक् प्रौढवचनो ब्रह्ममयेन वैदिकेन तेजसा । ब्रह्मवर्चसेनेत्यर्थः । ज्वलन्निव स्थितः । इवशब्दो निर्धारणार्थः । कश्चिदनिर्दिष्टो जटिलो जटावान् ब्रह्मचारीति शेषः । पिच्छादित्वादिलच्प्रत्ययः । शरीरबद्धो बद्धशरीरः । शरीरवानित्यर्थः । आहिताग्न्यादिषु पाठात् साधुः । प्रथमाश्रमो यथा ब्रह्मचर्याश्रम इव

यथाशब्द इवार्थे। तपोवनम्। देव्या इति शेषः। विवेश प्रविष्टवान्। अस्मिन् सर्गे वंशस्थं वृत्तम्—'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात् ॥

(२)

**तमातिथेयी बहुमानपूर्वया**
**सपर्यया प्रत्युदियाय पार्वती ।**
**भवन्ति साम्येऽपि निविष्टचेतसां**
**वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३१ ॥**

**तमिति**॥ अतिथिषु साध्व्यातिथेयी। "पथ्यतिथि" इत्यादिना ढञ्प्रत्ययः। 'टिड्ढाणञि'त्यादिना ङीप्। पार्वती तं ब्रह्मचारिणं बहुमानपूर्वया बहुमानः पूर्वो यस्याः तया। गौरवपूर्वयेत्यर्थः। सपर्ययार्चया। "सपर्यार्चार्हणाः समाः" इत्यमरः। प्रत्युदियाय प्रत्युज्जगाम। कथं समानेऽपि तस्यास्तादृशी प्रतिपत्तिरत आह—साम्ये सत्यपि निविष्टचेतसां स्थिरचित्तानां वपुर्विशेषेषु व्यक्तिविशेषेषु अति अतिशयितं गौरवं यासु ता अतिगौरवा अतिगौरवसहिताः क्रियाश्चेष्टा भवन्ति। प्रवर्त्तन्त इत्यर्थः। साधवो न साम्याभिनिवेशिन इति भावः ॥

(३)

**विधिप्रयुक्तां परिगृह्य सत्क्रियां**
**परिश्रमं नाम विनीय च क्षणम् ।**
**उमां स पश्यन्नृजुनैव चक्षुषा**
**प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३२ ॥**

**विधीति ।** स ब्रह्मचारी विधिना प्रयुक्तामनुष्ठितां सत्क्रियां पूजां परिगृह्य स्वीकृत्य क्षणं परिश्रमम् अध्वक्लमं च विनीय नाम । नामेत्यपरमार्थे । अथोमामृजुनैव विलासरहितेनैव चक्षुषा पश्यन्न-नुज्झितक्रमोऽत्यक्तोचितपरिपाटीकः सन् । वक्तुं प्रचक्रमे प्रारेभे ।

(४)

**अपि क्रियार्थं सुलभं समित्कुशं**
**जलान्यपि स्नानविधिक्षमाणि ते ।**
**अपि स्वशक्त्या तपसि प्रवर्तसे**
**शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥**

**अपीति ।** अत्रापिशब्दः प्रश्ने । क्रियार्थं होमादिकर्मानुष्ठा-नार्थम् । समिधश्च कुशाश्च समित्कुशम् । "जातिरप्राणिना"मिति द्वन्द्वैकवद्भावः । सुलभमपि ? सुलभं कच्चित् ? जलानि ते तव स्नानविधिक्षमाणि स्नानक्रियायोग्यानि कच्चित् ? किञ्च स्वशक्त्या निजसामर्थ्यानुसारेण तपसि प्रवर्तसे अपि ? देहमपीडयित्वा तपश्चरसि कच्चिदित्यर्थः । युक्तं च नामैतत् खलु । यस्माच्छरीरमाद्यं धर्मसाधनम् । धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते । तेषु च वपुरेव मुख्यं साधनम् । सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते । अत एव "सन्ततमात्मान-मेव गोपयीत" इति श्रुतिः ॥

(५)

**यदुच्यते पार्वति पापवृत्तये**
**न रूपमित्यव्यभिचारि तद्वचः ।**

तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥

**यदिति ॥** हे पार्वति ! रूपं सौम्याकृतिः पापवृत्तये पापाचरणाय न भवतीति यदुच्यते । लोकैरिति शेषः । तद्वचो न व्यभिचरति न स्खलतीत्यव्यभिचारि सत्यम् । 'यत्राकृतिस्तत्र गुणाः' 'न सुरूपाः पापसमाचारा भवन्ति' इत्यादयो लोकवादा न विसंवाद-मासादयन्तीत्यर्थः । कुत इदं ज्ञायते तदाह—तथाहीति । हे उदारदर्शने आयताक्षि । सुरूपे इत्यर्थः । अथवोन्नतज्ञाने । विवेकवतीत्यर्थः । ते तव शीलं सद्वृत्तम् । 'शीलं स्वभावे सद्वृत्ते' इत्यमरः । तपस्विनामप्युपदिश्यते अनेनेत्युपदेशः प्रवर्तकं प्रमाणं तत्तामुपदेशतां गतं प्राप्तम् । मुनयोऽपि त्वां वीक्ष्य स्ववृत्ते प्रवर्तन्त इति भावः ॥

(६)

प्रयुक्तसत्कारविशेषमात्मना
न मां परं सम्प्रतिपत्तुमर्हसि ।
यतः सतां सन्नतगात्रि सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते ॥ ३९ ॥

सम्प्रति मनोरथं जिज्ञासुः प्रस्तौति — **प्रयुक्तेति ॥** आत्मना त्वया प्रयुक्तः कृतः सत्कारविशेषः पूजातिशयो यस्य तं मां परमन्यं सम्प्रतिपत्तुमवगन्तुं नार्हसि । हे सन्नतगात्रि सन्नताङ्गि ! 'अङ्गगात्रकण्ठेभ्यः' इति वक्तव्याङ्ङीप् । यतः यस्मात् कारणान्मनस ईषिभिः मनीषिभिर्विद्वद्भिः । शकन्ध्वादित्वात् साधुः । सतां सङ्गतं

सख्यं सप्तभिः पदैरापद्यत इति साप्तपदीनं सप्तपदोच्चारणसाध्यमुच्यते। तच्चावयोस्त्वत्कृतसत्कारप्रयोगादेव सिद्धमित्यर्थः। "साप्तपदीनं सख्यम्" इति निपातनात् साधु॥

(७)

अतोऽत्रकिञ्चिद् भवतीं बहुक्षमां
द्विजातिभावादुपपन्नचापलः।
अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥

अत इति॥ हे तपोधने! अतः सख्याद्धेतोः अत्र अस्मिन् प्रस्तावे बहुक्षमां बहूक्तिसहाम्, यद्वा क्षमावतीम्। भवतीं त्वां द्विजातिभावाद् ब्राह्मणत्वादुपपन्नचापलः सुलभधाष्ट्र्योऽयं जनः। स्वयमित्यर्थः। किञ्चित् प्रष्टुमनो यस्य स किञ्चित् प्रष्टुमनाः प्रष्टुकामः। 'तुंकाममनसोरपि' इति मकारलोपः। रहसि भवं रहस्यं गोप्यं न चेत् प्रतिवक्तुमर्हसि॥

(८)

कुले प्रसूतिः प्रथमस्य वेधसः
त्रिलोकसौन्दर्यमिवोदितं वपुः।
अमृग्यमैश्वर्यसुखं नवं वयः
तपःफलं स्यात् किमतःपरं वद ॥ ४१ ॥

प्रष्टव्यमाह—

कुल इति॥ प्रथमस्य वेधसो हिरण्यगर्भस्य कुलेऽन्ववाये प्रसूतिरुत्पत्तिः। "यज्ञार्थं हि मयासृष्टो हिमवानचलेश्वरः" इति ब्रह्म-

पुराण वचनात्। वपुः शरीरं त्रयाणां लोकानां सौन्दर्यमिवोदितमेकत्र समाहृतम्। ऐश्वर्यसुखं सम्पत्सुखममृग्यमन्वेषणीयं न भवति। किन्तु सिद्धमेवेत्यर्थः। वयो नवम्। यौवनमित्यर्थः। अतः परमतोऽन्यत् किं तपःफलं स्याद्वद। अस्ति चेदिति शेषः। न किञ्चिदस्तीत्यर्थः॥

(९)

भवत्यनिष्टादपि नाम दुस्सहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी।
विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि त्वयि ॥ ४२ ॥

भवतीति॥ दुस्सहात्सोढुमशक्यादनिष्टाद् भर्त्रादिकृतादपि मनस्विनीनां धीरस्त्रीणामीदृशी तपश्चरणलक्षणा प्रतिपत्तिः प्रवृत्तिः। 'प्रतिपत्तिस्तु गौरवे। प्राप्तौ प्रवृत्तौ प्रागल्भ्ये' इति केशवः। भवति नाम। नामेति सम्भावनायाम्। विचारमार्गे प्रहितेन चेतसा चित्तेन तदनिष्टं च। हे कृशोदरि! त्वयि न दृश्यते। विचार्यमाणे तदपि नास्त्यसम्भावितत्वादित्यर्थः॥

(१०)

अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु कुतः पितुर्गृहे।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूचये ॥ ४३ ॥

अनिष्टाभावमेव प्रपञ्चयति—अलभ्येति ॥ हे सुभ्रु ! इयं त्वदीयाकृतिर्मूर्तिरलभ्यो लब्धुमनर्हः शोकेन भर्त्राद्यवमाननेन दुःखेनाभिभवस्तिरस्कारो यस्याः सा तथोक्ता । दृश्यत इति शेषः । असम्भावितश्चायमर्थ इत्याह—पितुर्गृहे विमाननावमानः कुतः न सम्भाव्यत एवेत्यर्थः । "नेयङुवङि"ति सूत्रे वेत्यनुवृत्त्या व्यवस्थितविभाषामाश्रित्य, सामान्ये नपुंसकत्वमाश्रित्य वा 'सुभ्रु' इत्यस्य साधुत्वं वक्तव्यम् । "सुभ्रूः कुतस्तातगृहेऽवमाननम्" इति पाठान्तरकरणन्तु साहसमेवोक्तोपपत्तिसम्भवात् । अन्यत्रापि "सुभ्रु त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषिताम्" इत्यादिप्रयोगदर्शनाद् वंशस्थवृत्ते पादादौ जगणभङ्गप्रसङ्गाच्चेत्यलं गोष्ठीभिः । न चान्यस्माद् भावीत्याह—पराभिमर्शः परधर्षणं तु तव नास्ति । पन्नगरत्नसूचये फणिशिरोमणिशलाकां ग्रहीतुमित्यर्थः । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । करं हस्तं कः प्रसारयेत् । 'सुभ्रु' इत्यत्र भ्रूशब्दस्योवङ्स्थानीयत्वात् "नेयङुवङ्स्थानावस्त्री" इति नदीसंज्ञाप्रतिषेधात् "अम्बार्थनद्योर्ह्रस्व" इति ह्रस्वत्वं नास्ति । तेन ह्रस्वः प्रामादिक इति केचित् । अन्ये तु "अप्राणिजातेश्चारज्वादीनाम्" इत्यत्र अलाबूः, कर्कन्धूः, इत्युकारान्तादप्यूङ्प्रत्ययमुदाजहार भाष्यकारः । एतस्मादेव ज्ञापकात् क्वचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वत्वमित्याहुः । अत एवाह वामनः—"ऊकारादप्यूङ्प्रकृते" इति ॥

(११)

**दिवं यदि प्रार्थयसे वृथा श्रमः**
**पितुः प्रदेशास्तव देवभूमयः ।**

**अथोपयन्तारमलं समाधिना**
**न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४५ ॥**

तपःप्रयोजनं निराकर्तुमाह—**दिवमिति** ॥ दिवं स्वर्गं प्रार्थयसे कामयसे यदि तर्हि श्रमस्तपश्चरणप्रयासो वृथा निष्फलः। यदि स्वर्गार्थं तप्यसे ततः श्रमं मा कार्षीः। कुतः। तव पितुर्हिमवतः प्रदेशाः देवभूमयः स्वर्गपदार्थाः तत्रत्या इत्यर्थः। अथोपयन्तारं वरं प्रार्थयसे तर्हि समाधिना तपसा अलम्। न कर्तव्यमित्यर्थः। निषेध्यस्य निषेधं प्रति करणत्वात्तृतीया। तथा हि। रत्नं कर्तृ नान्विष्यति न मृगयते ग्रहीतारमिति शेषः। किन्तु तद्रत्नं मृग्यते ग्रहीतृभिरिति शेषः। न हि वरार्थं त्वया तपसि वर्तितव्यम्। किन्तु तेनैव त्वदर्थमिति भावः॥

(१२)

**निवेदितं निश्वसितेन सोष्मणा**
**मनस्तु मे संशयमेव गाहते।**
**न दृश्यते प्रार्थयितव्य एव ते**
**भविष्यति प्रार्थितदुर्लभः कथम् ॥ ४६ ॥**

वरवाचकाक्षरश्रवणानन्तरमेव देव्या उष्णोच्छ्वासमालक्ष्य प्रश्नेषु च प्रत्युत्तरमनुपलभ्य स्वयमेवाशङ्क्याह—**निवेदितमिति** ॥ सोष्मणा निश्वसितेन निश्वासवायुना निवेदितम्। चिन्तानुभावेनोष्णोच्छ्वासेन ते वरार्थित्वं सूचितमित्यर्थः। तर्हि किं प्रश्नव्यसनेनेत्यत्राह—मनस्तु तथापि मे संशयमेव गाहते प्राप्नोति। कुतः?

ते तव। 'कृत्यानां कर्तरि वा' इति षष्ठी। प्रार्थयितव्यः प्रार्थयितुमर्ह एव न दृश्यते। प्रार्थितदुर्लभः प्रार्थितो यो दुर्लभः स कथं भविष्यति। नास्त्येवेत्यर्थः॥

(१३)

मुनिव्रतैस्त्वामतिमात्रकर्शितां
दिवाकराप्लुष्टविभूषणास्पदाम्।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते ॥ ४८ ॥

मुनिव्रतैरिति॥ मुनिव्रतैश्चान्द्रायणादिभिः अतिमात्रमत्यन्तं कर्शितां कृशीकृतां दिवाकरेण सूर्येणाप्लुष्टानि दग्धानि श्यामीकृतानि विभूषणास्पदानि भूषणस्थानानि यस्यास्तां तथोक्ताम्। अत एव दिवाहनि शशाङ्करेखामिव स्थितां त्वां पश्यतः सचेतसो जीवतः कस्य पुंसो मनो न दूयते न परितप्यते। अपि तु सर्वस्यैवेत्यर्थः॥

(१४)

कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः।
तदर्द्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ५० ॥

**कियदिति** ॥ हे गौरि ! कियत् किंप्रमाणकम् । किमवधिकमित्यर्थः । चिरं श्राम्यसि तपस्यसि । अत्यन्तसंयोगे द्वितीया । ममापि पूर्वाश्रमः प्रथमाश्रमो ब्रह्मचर्याश्रमस्तत्र सञ्चितं सम्पादितं तपो विद्यते । तस्य तपसोऽर्धभागेनैकदेशेन काङ्क्षितमिष्टं वरमुपयन्तारं लभस्व । तं वरं साधु सम्यग्वेदितुं ज्ञातुमिच्छामि । यद्यसौ योग्यो भवति तदा ममापि सम्मतिरिति भावः ॥

(१५)

**इति प्रविश्याभिहिता द्विजन्मना**
**मनोगतं सा न शशाक शंसितुम् ।**
**अथो वयस्यां परिपार्श्ववर्त्तिनीं**
**विवर्तितानञ्जननेत्रमैक्षत ॥ ५१ ॥**

**इतीति** ॥ इतीत्थं द्विजन्मना द्विजेन प्रविश्यान्तर्गत्वा । आप्तवद्रहस्यमुद्घाट्येत्यर्थः । अभिहितोक्ता सा पार्वती मनोगतं हृदिस्थं वरं शंसितुं वक्तुं न शशाक समर्था नाभूत् । लज्जयेति शेषः । अथोऽनन्तरं परिपार्श्ववर्तिनीं वयस्यां सखीं विवर्तिते ब्रह्मचारिमुखात् परावर्जितेऽनञ्जने व्रतवशाद्वर्जितकज्जले नेत्रे यस्मिन् कर्मणि तत्तथैक्षत नेत्रसंज्ञयैव उत्तरदानाय प्रेरयामासेत्यर्थः ॥

(१६)

**सखी तदीया तमुवाच वर्णिनं**
**निबोध साधो तव चेत् कुतूहलम् ।**
**यदर्थमम्भोजमिवोष्णवारणं**
**कृतं तपस्साधनमेतया वपुः ॥ ५२ ॥**

**सखीति ॥** तस्याः पार्वत्या इयं तदीया सखी वयस्या । तम् । वर्णोऽस्यास्तीति वर्णी, तम् ब्रह्मचारिणम् ' वर्णाद् ब्रह्मचारिणि ' इतीनिप्रत्ययः । उवाच ब्रूते स्म । किमिति । हे साधो विद्वन्! तव कुतूहलं चेत् । श्रोतुमस्तीति शेषः । तर्हि निबोधावगच्छ । आकर्णयेत्यर्थः । ' बुध अवगमने ' इति धातोर्भौवादिकाल्लोट् । श्रोतव्यं किं तदाह—यस्मै लाभाय इदं यदर्थम् । 'अर्थेन नित्यसमासः सर्वलिङ्गता च वक्तव्या ' इति वार्त्तिकनियमात् क्रियाविशेषणम् । एतया पार्वत्याम्भोजं पद्ममुष्णवारणमातपत्रमिव वपुः शरीरं तपःसाधनं कृतम् । तपःप्रवृत्तिकारणमुच्यते, श्रूयतामित्यर्थः ॥

(१७)

**इयं महेन्द्रप्रभृतीनधिश्रिय-**
**श्चतुर्दिगीशानवमत्य मानिनी ।**
**अरूपहार्यं मदनस्य निग्रहात्**
**पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ५३ ॥**

" दृङ्मनःसङ्गसङ्कल्पा जागरः कृशता रतिः । ह्रीत्यागोन्माद-मूर्च्छान्ता इत्यनङ्गदशा दश ॥ " इति तत्रास्याः काश्चिद्दशाः क्रममनादृत्यैव योजयति ' इय' मित्यादिभिः षड्भिः श्लोकैः । **इयमिति ॥** मानिनीन्द्राणीप्रभृतीरतिशय्य वर्तितव्यमित्यभिमानवतीयं पार्वत्यधिश्रियोऽधिकैश्वर्यान्महेन्द्रप्रभृतीनिन्द्रादींश्चतसृणां दिशामीशा-निन्द्रयमवरुणकुबेरान् । ' तद्धितार्थ ' इत्यादिनोत्तरपदसमासः ।

अवमत्यावधूय मदनस्य निग्रहान्निवर्हणाद्धेतोः। अकामुकत्वादित्यर्थः। रूपेण सौन्दर्येण हार्यो वशीकरणीयो न भवतीत्यरूपहार्यस्तम्। पिनाकः पाणौ यस्य तं पिनाकपाणिं हरम्। "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति साधुत्वम्। पतिं भर्त्तारमाप्तुमिच्छति। एतेन सङ्कल्पावस्था सूचिता॥

(१८)

असह्यहुङ्कारनिवर्त्तितः पुरा
पुरारिमप्राप्तमुखः शिलीमुखः।
इमां हृदि व्यायतपातमक्षिणो-
द्विशीर्णमूर्त्तेरपि पुष्पधन्वनः ॥ ५४ ॥

**असह्येति**॥ पुरा पूर्वमसह्येन सोढुमशक्येन हुङ्कारेण रौद्रेण निवर्त्तितः। अत एव पुरारिं हरमप्राप्तमुखोऽप्राप्तफलो विशीर्णमूर्त्तेर्नष्टशरीरस्यापि पुष्पधन्वनः कामस्य शिलीमुखो बाण इमां पार्वतीं हृदि व्यायतः। सुदूरावगाढ इति यावत्। तादृक् पातः प्रहारो यस्मिन् कर्मणि तत्तथाक्षिणोदबाधत। दग्धदेहस्यापि मार्गणो लग्नः। "मृदुः सर्वत्र बाध्यते" इति भावः। अनेन "विवृण्वती शैलसुतापि भावम्" ३/६८ इत्यत्रोक्तं चक्षुःप्रीतिमनःसङ्गाख्यमवस्थाद्वयमनन्तरावस्थोपयोगितयाऽनूद्य कार्श्यावस्था सूचिता॥

(१९)

तदाप्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका।

न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि ॥ ५५ ॥

तदेति ॥ तदेति छेदः। तदा प्रभृति। तत आरभ्येत्यर्थः। सप्तम्यर्थस्यापि दा प्रत्ययस्य पञ्चम्यर्थे लक्षणा। प्रभृतियोगे पञ्चमीनियमात्। पितुर्गृह उन्मदनोत्कटमन्मथा ललाटस्थालङ्कारो ललाटिका तिलकः। 'कर्णललाटात्कनलङ्कारे' इति कन् प्रत्ययः। तस्याश्चन्दनेन धूसरा धूसरवर्णा अलकाश्चूर्णकुन्तला यस्याः सा तथोक्ता बाला पार्वती जातु कदाचिदपि तुषारसंघातास्तुषारघनास्त एव शिलास्तासां तलेषूपरिभागेष्वपि निर्वृतिं सुखं न लभते स्म। एतेनारत्यपरसंज्ञा विषयविद्वेषावस्था द्वादशावस्थापक्षे सञ्ज्वरश्च व्यज्यते ॥

(२०)

उपात्तवर्णे चरिते पिनाकिनः
सबाष्पकण्ठस्खलितैः पदैरियम्।
अनेकशः किन्नरराजकन्यका
वनान्तसङ्गीतसखीररोदयत्. ॥ ५६ ॥

उपात्तेति ॥ पिनाकिनः शम्भोश्चरिते त्रिपुरविजयादिचेष्टित उपात्तवर्णे प्रारब्धगीतक्रमे। 'गीतक्रमे स्तुतौ वेदे वर्णशब्दः प्रयुज्यते' इति हलायुधः। सबाष्पे सगद्गदे कण्ठे स्खलितैर्विशीर्णैः पदैः सुप्तिङन्तरूपैः करणैः। वनान्ते सङ्गीतेन निमित्तेन सखीर्वयस्याः

किन्नरराजकन्यका: अनेकशो बहुशोऽरोदयदश्रुमोक्षमकारयत्। हरचरितगानजनितमदनवेदनामेनां वीक्ष्य किन्नर्योऽपि रुरुदुरिति भाव:। अत्र वर्णस्खलनलक्षणकार्योक्त्या पुन:पुनस्तत्कारणीभूतमूर्च्छा-वस्थाप्रादुर्भावो व्यज्यते। अन्यथा सखीरोदनानुपपत्तेरिति। द्वादशावस्थापक्षे तु प्रलयावस्था च व्यज्यते॥

(२१)

**त्रिभागशेषासु निशासु च क्षणं**
**निमील्य नेत्रे सहसा व्यबुध्यत।**
**क्व नीलकण्ठ व्रजसीत्यलक्ष्यवा-**
**गसत्यकण्ठार्पितबाहुबन्धना ॥ ५७ ॥**

**त्रिभागेति**॥ किञ्चेति चार्थ:। शिष्यत इति शेष:। कर्मणि घञ्। त्रिभ्यो भागेभ्य: शेषास्ववशिष्टासु। यद्वा रात्रेस्त्रियामात्वेन प्रसिद्धत्वात्तृतीयो भागस्त्रिभाग:। संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वमिष्यते। यथा 'शतांश:' 'सहस्रांश:' इति। त्रिभाग: शेषो यासां तासु निशासु क्षण क्षणमात्रं नेत्रे निमील्य मीलयित्वा सहसा सद्य:। हे नीलकण्ठ! क्व व्रजसि? कुत्र गच्छसीत्यलक्ष्या निर्विषया वाग्वचनं यस्या: सा तथोक्ता। तथाऽसत्ये मिथ्याभूते कण्ठे अर्पितं बाहुबन्धनं यस्या: सा तथा सती व्यबुध्यत विबुद्धवती। एतेन जागरोन्मादौ सूचितौ॥

(२२)

**यदा बुधै: सर्वगतस्त्वमुच्यसे**
**न वेत्सि भावस्थमिमं कथं जनम्।**

इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

स्वप्नसादृश्यप्रतिकृतिदर्शनतदङ्गस्पृष्टस्पर्शाख्याश्चत्वारो विरहिणां विनोदाः। तत्र स्वप्नसन्दर्शनमुक्त्वा प्रतिकृतिदर्शनमाह— **यदेति** ॥ यदा यत इत्यर्थः। यदेति हेताविल्युक्त्वा गणव्याख्यानेऽस्योदाहृतत्वात्। त्वं बुधैर्मनीषिभिः सर्वव्यापीत्युच्यसे। तत इत्यध्याहारः। भावे रत्याख्ये तिष्ठतीति भावस्थम्। त्वय्यनुरागिणमित्यर्थः। इमं जनम्। इममित्यात्मनिर्देशः। कथं न वेत्सि न जानासीति मुग्धया मूढया। अकिञ्चित्करश्चित्रगतोपालम्भ इत्यजानानयेत्यर्थः। तया स्वहस्तेनोल्लिखितश्चित्रे लिखितश्चन्द्रशेखरो रहस्येकान्ते। सखीमात्रसमक्षमित्यर्थः। उपालभ्यत साधिक्षेपमुक्तश्च। उक्तसमुच्चयार्थश्चकार। यद्यपि रहसीत्युक्तम्, तथापि सखीसमक्षकरणाल्लज्जात्यागो व्यज्यत एव ॥

(२३)

यदा च तस्याधिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती।
तदा सहास्माभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

**यदेति** ॥ जगत्पतेस्तस्येश्वरस्याधिगमे प्राप्तावन्यं विधिमुपायं विचिन्वती मृगयमाणा यदा नापश्यत्तदेयं पार्वती गुरोः पितुः अनुज्ञयास्माभिः सह तपसे तपश्चरितुं तपोवनं प्रपन्ना प्राप्ता ॥

(२४)

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोस्याः शशिमौलिसंश्रयः ॥ ६० ॥

द्रुमेष्विति ॥ सख्या पार्वत्या स्वयं कृतं जन्म येषां तेषु। स्वयं रोपितेष्वित्यर्थः। तपसः साक्षिषु साक्षाद्द्रष्टव्येषु द्रुमेष्वपि फलं दृष्टं लब्धम्। जनितमित्यर्थः। अस्याः पार्वत्याः शशिमौलिसंश्रयश्चन्द्रशेखरविषयो मनोरथस्तु प्ररोहाभिमुखोऽङ्कुरोन्मुखोऽपि न दृश्यते। "प्ररोहस्त्वङ्कुरः" इति वैजयन्ती। स्वयं रोपितवृक्षफलकालेऽप्यस्या मनोरथस्य नाङ्कुरोदयोप्यस्ति। फलाशा तु दूरापास्तेत्यर्थः ॥

(२५)

न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ॥ ६१ ॥

नेति ॥ प्रार्थितः सन् दुर्लभः प्रार्थितदुर्लभः स देवस्तपःकृशां तपसा कृशां क्षीणामत एव सखीभिरस्रोत्तरमश्रुप्रधानं यथा भवति तथेक्षितामिमां नः सखीं तस्येन्द्रस्यावग्रहेणानावृष्ट्या क्षतां पीडिताम्। 'वृष्टिर्वर्षं तद्विघातेवग्रहावग्रहौ समौ' इत्यमरः। अवग्रहो वर्षप्रतिबन्ध इत्यर्थः। सीतां कृष्टभुवम्। "सीता लाङ्गलपद्धतिः" इत्यमरः।

वृषा वासव इव। "वासवो वृत्रहा वृषा" इत्यमरः। कदाभ्युपपत्स्यते कदानुग्रहीष्यती न वेद्मि। अत्र वाक्यार्थः कर्म। तदवग्रहक्षतामित्यत्रावग्रहक्षतामित्यनेनैव गतार्थत्वे तत्पदस्य वैयर्थ्यापत्तेस्तदिति भिन्नं पदं वेद्मीत्यस्य कर्मेति युक्तमुत्पश्यामः॥

(२६)

**अगूढसद्भावमितीङ्गितज्ञया**
**निवेदितो नैष्ठिकसुन्दरस्तया।**
**अयीदमेवं परिहास इत्युमा-**
**मपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥**

**अगूढेति ॥** इङ्गितज्ञया पार्वतीहृदयाभिज्ञया। 'इङ्गितं हृद्गतो भावः' इति सज्जनः। तया गौरीसख्या इति एवम् अगूढसद्भावं प्रकाशितसदभिप्रायं यथा तथा निवेदितो ज्ञापितो निष्ठा मरणमवधिर्यस्य स नैष्ठिको यावज्जीवब्रह्मचारी सुन्दरो विलासी नैष्ठिकश्चासौ सुन्दरश्चेति तथोक्तः। अव्यञ्चितं हर्षलक्षणं मुखरागादिहर्षलिङ्गं येन तथाभूतः सन्। अयि गौरी! अयीति कोमलामन्त्रणे। इदं त्वत्सखीभाषितमेवम्। सत्यं किमित्यर्थः। परिहासः केलिर्वा। "द्रवकेलिपरीहासाः" इत्यमरः। इत्येवमुमामपृच्छत् पृष्टवान्॥

(२७)

**अथाग्रहस्ते मुकुलीकृताङ्गुलौ**
**समर्पयन्ती स्फटिकाक्षमालिकाम्।**

कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ६३ ॥

**अथेति** ॥ अथानन्तरमद्रेस्तनया पार्वती मुकुलीकृताङ्गुलौ सम्पुटीकृताङ्गुलौ अग्रश्चासौ हस्तश्चेति समानाधिकरणसमासः। 'हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदादि'ति वामनः। तस्मिन्नग्रहस्ते स्फटिकानामक्षमालिकां जपमालिकामर्पयन्त्यामुञ्चन्ती कथञ्चिन्महता कष्टेन चिरव्यवस्थापितवाक् चिरेण स्वीकृतवाक्। एतेन लज्जोपरोधो व्यज्यते। मिताक्षरं परिमितवर्णं यथा तथाभाषत बभाषे ॥

(२८)

यथा श्रुतं वेदविदां वर त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥

किमुवाचेत्याह—**यथेति** ॥ हे वेदविदां वर वैदिकश्रेष्ठ! त्वया यथा श्रुतं सम्यक् श्रुतम्। श्रुतार्थमेवाह—अयं जनः। स्वयमित्यर्थः। उच्चैःपदस्य शिवलाभरूपोन्नतस्थानस्य लङ्घने आक्रमण उत्सुकः। किमत्रायुक्तमित्यत्राह—इदं तपस्तदवाप्तेस्तस्योच्चैः पदस्यावाप्तेः प्राप्तेः साधनं किल। किलेत्यलीके। अतितुच्छत्वादसाधकमेवेत्यर्थः। तर्हि त्यज्यतामित्याशङ्क्य दुराशा मां

न मुञ्चतीत्याशयेनाह—मनोरथानां कामानामगतिरविषयो न विद्यते। न हि स्वाश्रयशक्तिपर्यालोचनया कामाः प्रवर्त्तन्त इति भावः ॥

(२९)

अथाह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्त्तसे।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे ॥ ६५ ॥

**अथेति ॥** अथ वर्णी ब्रह्मचारी। "वर्णिनो ब्रह्मचारिणः" इत्यमरः। आह उवाचेत्यर्थः। 'आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूलकः' इत्याह वामनः। किमित्याह—महेश्वर महादेवो विदितः। मया ज्ञायत इत्यर्थः। बुध्यर्थत्वाद्वर्त्तमाने क्तप्रत्ययः तद्योगात् षष्ठी च। येन त्वं प्राग्भग्नमनोरथा कृतेति भावः। पुनरेव त्वं तदर्थिन्येव तत्कामैव वर्तसे। तत्स्वभावमनुभूयापीति पुनापदार्थः। अनुसरणे को दोषस्तत्राह—अमङ्गलाभ्यासेऽमङ्गलाचारे रतिर्यस्य तम्। तं यथोक्तमीश्वरं विचिन्त्य विचार्य तवानुवृत्तिमनुसरणं कर्तुं नोत्सहे नानुमन्तुं शक्नोमीत्यर्थः ॥

(३०)

अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥

अवस्त्विति ॥ अवस्तुनि तुच्छवस्तुनि निर्बन्धोभिनिवेशः परं प्रधानं यस्यास्तस्याः सम्बुद्धिरवस्तुनिर्बन्धपरे पार्वति, आमुक्तमासञ्जितं विवाहे यत्कौतुकं हस्तसूत्रं तद्यस्य स तेऽयं करः। 'कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले' इति शाश्वतः। वलयीकृताहिना भूषणीकृतसर्पेण, शम्भोर्महादेवस्य करेण करणभूतेन। तदेव प्रथमं तत्प्रथमं। अपरिचितत्वादतिभयङ्करमिति भावः। तच्च तदवलम्बनं ग्रहणं चेति तत्प्रथमावलम्बनम्। कथं नु सहिष्यते। न कथञ्चिदपि सहिष्यत इत्यर्थः। अग्रतो यद् भावि तद्दूरेऽवतिष्ठताम्। प्रथमं करग्रह एव दुःसह इति भावः॥

(३१)

**त्वमेव तावत् परिचिन्तय स्वयम्**
**कदाचिदेते यदि योगमर्हतः।**
**वधूदुकूलं कलहंसलक्षणं**
**गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥**

**त्वमेवेति** ॥ हे गौरि! त्वमेव स्वयमात्मना। तावदिति मात्रार्थे। यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः। इदमेवोदाहृतं च गणव्याख्याने। परिचिन्तय पर्यालोचय। किमिति। कलहंसलक्षणं कलहंसचिह्नम्। 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः। वध्वा नवोढाया दुकूलं वधूदुकूलम्। 'वधूः स्नुषा नवोढा स्त्री' इति विश्वः। तथा शोणितबिन्दून् वर्षतीति यथोक्तम्। गजाजिनं च कृत्तिवासश्च। तत्पिनाकिन इत्याशयः। एते कदाचिज्जात्वपि

योगं सङ्गतिमर्हतो यद्यर्हतः किम् ? एतत्त्वमेव चिन्तयेति पूर्वेणान्वयः। पाणिग्रहणकाले वधूवरयोर्वस्त्रान्तग्रन्थिः क्रियते। कृत्तिवाससा पाणिपीडने तु दुकूलधारिण्यास्तव तत् कथं सङ्घटिष्यत इति भावः॥

(३२)

**चतुष्कपुष्पप्रकरावकीर्णयोः**
**परोऽपि को नाम तवानुमन्यते।**
**अलक्तकाङ्कानि पदानि पादयो-**
**र्विकीर्णकेशासु परेतभूमिषु॥ ६८॥**

**चतुष्केति॥** चतुष्के गृहविशेषे यः पुष्पप्रकरः तत्रावकीर्णयोर्न्यस्तयोः। कुसुमास्तृतदिव्यभवनभूसञ्चारोचितयोरित्यर्थः। तव पादयोरलक्तकाङ्कानि लाक्षारञ्जितानि पदानि पादाकाराणि पादन्यास चिह्नानि। 'पादं शब्दे च वाक्ये च व्यवसायापदेशयोः पादतच्चिह्नयोः' इति विश्वः। विकीर्णा विक्षिप्ताः केशाः शवशिरोरुहाः यासु तासु विकीर्णकेशासु। 'स्वाङ्गाच्चोपसर्जनादसंशय गोपधादि'ति विकल्पान्न ङीष्। परेतभूमिषु प्रेतभूमिषु श्मशानेष्वित्यर्थः। परोऽपि शत्रुरपि को नामानुमन्यते। न कोऽपीत्यर्थः। नामेति कुत्सायाम्। पिनाकपाणिपाणिग्रहणात्तस्य परेतभूसञ्चारित्वेन साहचर्यात्तवापि तत्र सञ्चारोऽवश्यंभावीति भावः॥

(३३)

**इयं च तेऽन्या पुरतो विडम्बना**
**यदूढया वारणराजहार्यया।**

**विलोक्य वृद्धोक्षमधिष्ठितं त्वया**
**महाजनः स्मेरमुखो भविष्यति ॥ ७० ॥**

**इयमिति** ॥ इयं च ते तव पुरत आदावेवान्या विडम्बना। परिहास इत्यर्थः। का सेत्यत्राह—ऊढया परिणीतया। वहेः कर्मणि क्तः। वारणराजहार्यया त्वया अधिष्ठितमारूढं वृद्धमुक्षाणं वृद्धोक्षम्। 'अचतुर' इत्यादिना निपातः। विलोक्य महाजनः साधुजनः स्मेरमुखः। सस्मितमुखो भविष्यत्युपहसिष्यति यत्। इयमिति पूर्वेण सम्बन्धः। स्मेरेति 'नमिकम्पिरभ्यजस'—इत्यादिना रप्रत्ययः॥

(३४)

**द्वयं गतं सम्प्रति शोचनीयतां**
**समागमप्रार्थनया कपालिनः**
**कला च सा कान्तिमती कलावत-**
**स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ ७१ ॥**

**द्वयमिति** ॥ कपालिनः शिरोऽस्थिधारिणः समागमप्रार्थनया प्राप्तिकामनया। सम्प्रति द्वयं शोचनीयतां शोच्यत्वं गतम्। किं तदाह—सा प्रागेव हरशिरोगता। अत्र सेति प्रसिद्धार्थत्वान्न यच्छब्दापेक्षा। तदुक्तं काव्यप्रकाशे—'प्रक्रान्त-प्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते' इति। कान्तिमती। नित्ययोगे मतुप्। कलावतश्चन्द्रस्य कला षोडशो भागश्चास्य लोकस्य नेत्रकौमुदी नेत्रानन्दिनीत्यर्थः। त्वं च। कान्तिमतीत्व नेत्रकौमुदीत्व विशेषणयोरत्राप्यन्वयः। प्रागेकैव

शोच्या। सम्प्रति तु त्वमप्यपरेति द्वयं शोच्यमिति पिण्डितार्थः। शोच्यत्वं च निकृष्टाश्रयणादिति भावः॥

(३५)

**वपुर्विरूपाक्षमलक्ष्यजन्मता**
**दिगम्बरत्वेन निवेदितं वसु।**
**वरेषु यद् बालमृगाक्षि मृग्यते**
**तदस्ति किं व्यस्तमपि त्रिलोचने॥ ७२॥**

"कन्या वरयते रूपं माता वित्तं पिता श्रुतम्। बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जना"॥ इति लोकानामाभाषणम्। तत्र किञ्चिदपि नास्तीत्याह——**वपुरिति**॥ वपुस्तावदस्य विरूपाणि विकृतरूपाणि अक्षीणि नेत्राणि यत्र तद्विरूपाक्षम्। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' इति षच्प्रत्ययः। वैरूप्यं च त्रिनेत्रत्वादिति क्षीरस्वामी। अतो न सौन्दर्यवार्त्तापीत्यर्थः। अलक्ष्यमज्ञातं जन्म यस्य तस्य भावस्तत्ता कुलमपि न ज्ञायत इत्यर्थः। "अलक्षिता जनि"रिति पाठे जनिरुत्पत्तिरलक्षिता न ज्ञाता। "जनिरुत्पत्तिरुद्भवः" इत्यमरः। वसु वित्तं दिगम्बरत्वेनैव निवेदितम्। नास्तीति ज्ञापितमित्यर्थः। यदि वित्तं भवति तदा कथं दिगम्बरो भवति। अतो ज्ञेयं निर्धनोयमिति। किं बहुना, हे बालमृगाक्षि! पार्वति! वरेषु वोढृषु। "वरौ जामातृ वोढारौ" इति विश्वः। यद्रूपवित्तादिकं मृग्यते कन्याबन्धुभिः अन्विष्यते तत् त्रिलोचने त्र्यम्बके व्यस्तम् एकमपि। समस्तं माभूदिति भावः। अस्ति किम्? नास्तीत्यर्थः॥

(३६)

निवर्त्तयास्मादसदीप्सितान्मनः
क तद्विधस्त्वं क च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया ॥ ७३ ॥

**निवर्तयेति ॥** अस्मादसदीप्सितादनिष्टमनोरथान्मनो निवर्त्तय निवारय। सा पूर्वोक्ता विधा प्रकारो यस्य स तथोक्तः। अमङ्गलशील इत्यर्थः। क? पुण्यलक्षणा प्रशस्तभाग्यचिह्ना त्वं च क? महदन्तरमित्यर्थः। अतो न तवायमर्ह इति यावत्। तथाहि। साधुजनेन। 'साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्' इति विश्वः। श्मशानशूलस्य श्मशानभूमिनिखातस्य वध्यशङ्को-र्वैदिकी वेदोक्ता। यूपो नाम पशुबन्धनसाधनभूतः संस्कृतदारु-विशेषस्तस्य सत्क्रिया प्रोक्षणाभ्युक्षणादिसंस्कारो यूपसत्क्रिया नापेक्ष्यते नेष्यते। यथा श्मशानशूले यूपसत्क्रिया न क्रियते तथा त्वमपि तस्मै न घटस इति तात्पर्यार्थः॥

(३७)

इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ॥ ७४ ॥

**इतीति ॥** इत्येवं प्रकारेण द्विजातौ द्विजे प्रतिकूलवादिनि सति प्रवेपमानेन चञ्चलेनाधरेणाधरोष्ठेन लक्ष्योऽनुमेयः कोपः क्रोधो

यस्यास्तथोक्तया तया पार्वत्योपान्तलोहिते प्रान्तरक्ते विलोचने विकुञ्चिते कुटिलिते भ्रूलते यस्मिंस्तत्तथा। सभ्रूभङ्गमित्यर्थः। तिर्यक् साचि आहिते निहिते। अनादरात्तिर्यगैक्ष्यतेत्यर्थः॥

(३८)

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम्॥ ७५।

उवाचेति॥ अथैनं ब्रह्मचारिणमुवाच च। किमिति— परमार्थतः तत्त्वतो हरं न वेत्सि न जानासि नूनम्। कुतः? यतो मामेवमुक्तया रीत्यात्थ ब्रवीषि। "ब्रुवः पञ्चानामादितः" इति रूपसिद्धिः। अज्ञानादेवायं शिवद्वेषस्तवेत्याशयेनाह—मन्दाः मूढाः। "मूढाल्पापटु निर्भाग्या मन्दाः" इत्यमरः। लोकसामान्यमितरजनसाधारणं न भवतीत्यलोकसामान्यमचिन्त्यहेतुकं दुर्बोधकारणकं महात्मनां चरितम्। द्विषन्ति हेत्वपरिज्ञानाद्दूषयन्ति। विद्वांसस्तु कोऽप्यत्र हेतुरस्तीति बहुमन्यन्त इत्यर्थः॥

(३९)

विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा।
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः॥ ७६॥

सम्प्रति अमङ्गलाभ्यासरतिम् (५/६५) इत्याद्युक्तं दूषणजातं षड्भिः श्लोकैः परिहर्तुमारभते––**विपदिति** ॥ विपत्प्रतीकारपरेण अनर्थपरिहारार्थिनेत्यर्थः। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः। भूतिसमुत्सुकेनैश्वर्यकामेन वा मङ्गलं गन्धमाल्यादिकं निषेव्यते। शरणे रक्षणे साधुः शरण्यः। "तत्र साधुः" इति यत्प्रत्ययः। 'शरणं गृहरक्षित्रो'रित्यमरः। जगतः शरण्यस्तस्य जगच्छरण्यस्य निराशिषो निरभिलाषस्य सतः शिवस्य "आशीरुरगदंष्ट्रायां विप्रवाक्याभिलाषयोः" इति शाश्वतः। आशया तृष्णयोपहता दूषिता आत्मवृत्तिरन्तःकरणवृत्तिर्येषां तैरेभिर्मङ्गलैः किम् ? वृथेत्यर्थः। पूर्वं मङ्गलमित्येकवचनस्य जात्यभिप्रायत्वादेभिरिति बहुवचनेन परामर्शो न विरुध्यते। इष्टावाप्त्यनिष्टपरिहारार्थिनो हि मङ्गलाचारनिर्बन्धः। तदुभयासंसृष्टस्य तु यथाकथञ्चिदास्ताम्। को दोष इत्यर्थः। एतेन अमङ्गलाभ्यासरतिम् (१५/५५) इत्युक्तं प्रत्युक्तम् ॥

(४०)

**अकिञ्चनः सन् प्रभवः स सम्पदां**
**त्रिलोकनाथः पितृसद्मगोचरः ।**
**स भीमरूपः शिव इत्युदीर्यते**
**न सन्ति याथार्थ्यविदः पिनाकिनः ॥ ७७ ॥**

**अकिञ्चनेति** ॥ स हरः न विद्यते किञ्चन द्रव्यं यस्य सोऽकिञ्चनो दरिद्रः सन् सम्पदां प्रभवत्यस्मादिति प्रभवः कारणम्। पितृसद्मगोचरः श्मशानाश्रयः सन् त्रयाणां लोकानां नाथः। 'तद्धितार्थ'

इत्यादिनोत्तरपदसमासः। स देवो भीमरूपो भयङ्कराकारः सन् शिवः सौम्यरूपः इत्युदीर्यत उच्यते। अतः पिनाकिनो हरस्य यथाभूतोऽर्थो यथार्थस्तस्य भावो याथार्थ्यं तत्त्वं तस्य विदो न सन्ति। लोकोत्तरमहिम्नो निर्लेपस्य यथाकथञ्चिद् अवस्थानं न दोषायेति भावः। एतेन 'अवस्तुनिर्बन्धपरे' (५/६६) इति परिहृतं वेदितव्यम् ॥

(४१)

**विभूषणोद्भासि पिनद्धभोगि वा**
**गजाजिनालम्बि दुकूलधारि वा।**
**कपालि वा स्यादथवेन्दुशेखरं**
**न विश्वमूर्तेरवधार्यते वपुः ॥ ७८ ॥**

देवस्य लौकिकमलौकिकं च प्रसाधनं नास्तीत्याशयेनाह— **विभूषणेति ॥** विश्वं मूर्तिर्यस्येति विश्वमूर्तिः तस्याष्टमूर्तेः शिवस्य वपुः शरीरं भूषणैः उद्भासत इति भूषणोद्भासि स्यात्। पिनद्धभोगि आमुक्तभुजङ्गमं वा स्यात्। पिनद्धेति नह्यतेरपिपूर्वात् कर्मणि क्तः। 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो'रित्यकारलोपः। गजाजिनालम्बि स्यात्। अथवा दुकूलधारि स्यात्। कपालमस्यास्तीति कपालि ब्रह्मशिरःकपालशेखरं वा स्यात्। इन्दुशेखरं वा स्यात्। नावधार्यते न निर्धार्यते। सर्वं सम्भवतीत्यर्थः। एतेन 'त्वमेव तावत्' (५/७६) इति श्लोकोक्तं प्रत्युक्तमिति ज्ञेयम्।

(४२)

तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्मरजो विशुद्धये ।
तथाहि नृत्याभिनयाक्रियाच्युतं
विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥

चिताभस्मधारणस्यामङ्गलत्वमाशङ्क्याह—**तदिति** ॥ तस्य शिवस्याङ्गं तस्य संसर्गमवाप्यासाद्य चिताभस्मैव रजो विशुद्धये कल्पते । अलम् । पर्याप्नोतीत्यर्थः । अलमर्थयोगात् "नमःस्वस्तिस्वाहे"त्यादिना चतुर्थी । ध्रुवं शोधकत्वं प्रमाणसिद्धमित्यर्थः । प्रमाणमेवाह-—तथाहीति । प्रसिद्धमेवेत्यर्थः । नृत्ये ताण्डवे योऽभिनयोऽर्थव्यञ्जकचेष्टाविशेषः स एव क्रिया तया निमित्तेन च्युतं पतितम् । चिताभस्मरज इति शेषः । अम्बरौकसां देवानां मौलिभिर्विलिप्यते ध्रियते । अशुद्धं चेत् कथमिन्द्रादिभिर्ध्रियेतेत्यर्थापत्तिरनुमानं वा प्रमाणमित्यर्थः ॥

(४३)

असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोरुणाङ्गुली ॥ ८० ॥

यदुक्तं 'दिगम्बरत्वेन निवेदितं वसु' (५/७२) इयं च तेऽन्यापुरतो विडम्बना (५/७०) इत्यादि च तत्रोत्तरमाह—

**असम्पद इति ॥** प्रभिन्नो मदस्रावी दिग्वारणो दिग्गजो वाहनं यस्य सः। ऐरावतेनोढ इत्यर्थः। वृषा देवेन्द्रोऽसम्पदो दरिद्रस्य वृषेण गच्छतो वृषमारूढस्य तस्येश्वरस्य पादौ मौलिना मुकुटेनोपगम्य। प्रणम्येत्यर्थः। विनिद्राणां विकसितानां मन्दाराणां कल्पतरुकुसुमानां रजोभिः परागैररुणा अङ्गुल्यो ययोस्तौ तथोक्तौ करोति। दिग्गजारोहिणामिन्द्रादीनामपि वन्द्यस्येन्दुमौलेः किं सम्पदा। वृषारोहणे वा को दोष इत्यर्थः ॥

(४४)

**विवक्षता दोषमपि च्युतात्मना**
**त्वयैकमीशं प्रति साधु भाषितम्।**
**यमामनन्त्यात्मभुवोऽपि कारणं**
**कथं स लक्ष्यप्रभवो भविष्यति ॥ ८१ ॥**

यदुक्तम् 'अलक्ष्यजन्मता' (५/७२) इति तत्रोत्तरमाह—
**विवक्षतेति ॥** च्युतात्मना नष्टस्वभावेनात एव दूषणं विवक्षत वक्तुमिच्छतापि त्वया ईशं प्रत्येकम् 'अलक्ष्यजन्मता' इत्येतदेकम्। वच इत्यर्थः। साधु भाषितं सम्यगुक्तम्। कुतः। यमीश्वरमात्मभुवोऽपि ब्रह्मणोऽपि "ब्रह्मात्मभूः सुरज्येष्ठः" इत्यमरः। कारणमामनन्त्युदाहरन्ति। विद्वांस इति शेषः। 'पाघ्राध्मास्थाम्नादाण्'—इत्यादिना मनादेशः। स ईश्वरः कथं लक्ष्यप्रभवो लक्ष्यजन्मा भविष्यति। अनादिनिधनस्य भगवतः कारणशङ्काकलङ्कश्च नान्विष्यत इत्यर्थः ॥

(४५)

**अलं विवादेन यथाश्रुतस्त्वया**
**तथाविधस्तावदशेषमस्तु सः ।**
**ममात्र भावैकरसं मनः स्थितं**
**न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥**

**अलमिति ॥** अथवा विवादेन कलहेनालम् । त्वया यथा येन प्रकारेण स ईश्वरः श्रुतोऽशेषं कार्त्स्न्येन तथाविधस्तावत्प्रकार एवास्तु । मम मनस्तत्रेश्वरे भावः शृङ्गार एकोऽद्वितीयो रस आस्वाद्यः यस्य तत्तथा स्थितम् । तथाहि । कामवृत्तिः स्वेच्छाव्यवहारी वचनीयमस्थानसङ्गापवादं नेक्षते न विचारयति । न हि स्वेच्छासञ्चारिणो लोकापवादाद् बिभ्यतीति भावः ॥

(४६)

**निवार्यतामालि किमप्ययं वटुः**
**पुनर्विवक्षुः स्फुरितोत्तराधरः ।**
**न केवलं यो महतोऽपभाषते**
**शृणोति तस्मादपि यः स पापभाक् ॥ ८३ ॥**

**निवार्यतामिति ॥** हे आलि सखि ! "आली सखी वयस्या च" इत्यमरः । स्फुरितोत्तराधरः स्फुरणभूयिष्ठोष्ठोऽयं वटुर्माणवकः पुनः किमपि विवक्षुर्वक्तुमिच्छुः । ब्रुवः सन्नन्तादुप्रत्ययः । निवार्यताम् । वक्तुमेव अवसरं कथं न ददासीत्यत्राह—यो महतः पूज्यानपभाषते अपवदति न केवलं स पापभाग्भवति । किन्तु तस्मादपभाषमाणात् पुरुषाद्यः शृणोति सोऽपि पापभाक् ।

भवतीति शेषः। अत्र स्मृतिः—"गुरोः प्राप्तः परीवादो न श्रोतव्यः कथञ्चन। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥" इति॥

(४७)

इतो गमिष्याम्यथवेति वादिनी
चचाल बाला स्तनभिन्नवल्कला।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ॥ ८४ ॥

सम्प्रति गन्तव्यपक्षमाश्रयते—**इत इति**॥ अथवेतोऽन्यत्र गमिष्यामीति वादिनी वदन्ती स्तनाभ्यां भिन्नवल्कला रयवशात् कुचस्रस्तचीरा बाला पार्वती चचाल। वृषराजकेतनो वृषभध्वजश्च स्वरूपमास्थाय निजरूपमाश्रित्य कृतस्मितः सन् तां पार्वतीं समाललम्बे जग्राह॥

(४८)

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ॥ ८५ ॥

**तमिति**॥ तं देवं वीक्ष्य वेपथुमती कम्पवती सरसाङ्गयष्टिः स्विन्नगात्री। महादेवदर्शनेन देव्याः सात्त्विकभावोदय

उक्तः। निक्षेपणायान्यत्र विन्यासाय उद्धृतमुत्क्षिप्तं पदमङ्घ्रिमुद्वहन्ती शैलाधिराजतनया पार्वती मार्गेऽचलस्तस्य व्यतिकरेण समाहत्या। अवरोधनेनेति यावत्। आकुलिता सम्भ्रमिता सिन्धुर्नदीव। "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः। न ययौ न तस्थौ। लज्जयेति भावः। वसन्ततिलका वृत्तमेतत्॥

(४९)

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते॥ ८६॥

अद्येति॥ चन्द्रमौलौ शिवे। हे अवनताङ्गि पार्वति। अद्य प्रभृति। अस्माद्दिनादारभ्येत्यर्थः। प्रभृतियोगादद्येति सप्तम्यर्थवाचिना पञ्चम्यर्थो लक्ष्यते। तव तपोभिः क्रीतः। 'दासृदाने' दासते आत्मानं ददातीति दासोऽस्मीति वादिनि वदति सति। सा देव्यह्नाय सपदि। "द्राग्झटित्यञ्जसाह्नाय द्राङ् मङ्क्षु सपदि द्रुतम्" इत्यमरः। नियमजं तपोजन्यम्। क्लमं क्लेशमुत्ससर्ज। फलप्राप्त्या क्लेशं विसस्मारेत्यर्थः। तथाहि। क्लेशः फलेन फलसिद्ध्या पुनर्नवतां विधत्ते। पूर्ववदेवाक्लिष्टतामापादयतीत्यर्थः। सफलः क्लेशो न क्लेश इति भावः॥

## परिशीलनम् ।

१. " प्रचक्रमे वक्तुमनुज्झितक्रमः " इत्युपक्रममाणं ब्रह्मचारिवचनमनुवदत ।

२. सख्या ब्रह्मचारिणे दत्तान्युत्तरवाक्यानि विवृणुत ।

३. सखीवचः पार्वत्यनुमतं विज्ञाय ब्रह्मचारी किमाह ?

४. ब्रह्मचारिणो हास्यवचांसि श्रुतवती पार्वती किमभाणीत् ?

५. प्रकृतमनुसृत्याशयं विशदीकुरुत —

(१) "शरीरमाद्यं खलु धर्मसाधनम् " ।

(२) " न रत्नमन्विष्यति मृग्यते हि तत् " ।

(३) " क्लेशः फलेन हि पुनर्नवतां विधत्ते " ।

६. " मुनिव्रतैस्त्वाम्—कस्य मनो न दूयते " ।
अत्र शशाङ्कलेखायाः पार्वत्याश्च सादृश्यं कथमिति स्पष्टयत ।

७. प्रयोगान् विपरिणमयत —

(१) " त्वं काङ्क्षितं लभस्व ", (२) " मनस्तु मे संशयमेव गाहते ", (३) " कृतं तपःसाधनमेतया वपुः ", (४) " मुग्धया रहस्युपालभ्यत चन्द्रशेखरः ", (५) " द्वयं गतं सम्प्रति शोचनीयताम् " ।

८. विग्रहमुक्त्वा वृत्तिनामानि ब्रूत —

(१) जटिलः, (२) आतिथेयी (३) समित्कुशम्, (४) साप्तपदीनम्, (५) मनोगतम्, (६) वर्णी, (७) पिनाकपाणिम्, (८) ललाटिका, (९) नैष्ठिक सुन्दरः, (१०) वलयीकृतः, (११) अकिञ्चनः, (१२) विवक्षुः।

९. समासकार्याणि वदत —

(१) शरीरबद्धः, (२) प्रष्टुमनाः, (३) पुष्पधन्वनः, (४) वृद्धोक्षः, (५) महाजनः, (६) विरूपाक्षम्।

---

कृत्ताद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः।

## द्वितीयः पाठः

# सीतासमाश्वासनम् ।

[समुद्रमुल्लङ्घ्य, अशोकवनिकायां स्थितां सीतां दृष्ट्वा, सम्भाष्य, रामाङ्गुलीयकं तस्यै समर्प्य चूडामणिं प्रतिगृह्य च, प्रस्थातुकामो हनुमान् तां समाश्वासयति ।]

[१] मणिं दत्वा ततः सीता हनुमन्तमथाब्रवीत् ।
अभिज्ञानमभिज्ञातमेतद्रामस्य तत्त्वतः ॥

[२] मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति ।
वीरो जनन्या मम च राज्ञो दशरथस्य च ॥

[३] स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम ।
अस्मिन् कार्यसमारम्भे प्रचिन्तय यदुत्तरम् ॥

[४] त्वमस्मिन् कार्यनिर्योगे प्रमाणं हरिसत्तम ।
हनुमन् यत्नमास्थाय दुःखक्षयकरो भव ॥

[५] तस्य चिन्तय यो यत्नो दुःखक्षयकरो भवेत् ।
स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः ॥

[६] शिरसाऽवन्द्य वैदेहीं गमनायोपचक्रमे ।
ज्ञात्वा सम्प्रस्थितं देवी वानरं मारुतात्मजम् ॥

[७] बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ।
कुशलं हनुमन् ब्रूयाः सहितौ रामलक्ष्मणौ ॥

[८] सुग्रीवं च सहामात्यं वृद्धान् सर्वांश्च वानरान् ।
ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितम् ॥

[९] यथा स च महाबाहुर्मां तारयति राघवः ।
अस्माद्‌दुखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥

[१०] जीवन्तीं मां यथा रामः सम्भावयति कीर्त्तिमान् ।
तत्तथा हनुमन् वाच्यं वाचा धर्ममवाप्नुहि ॥

[११] नित्यमुत्साहयुक्ताश्च वाचः श्रुत्वा त्वयेरिताः ।
वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥

[१२] मत्सन्देशयुता वाचस्त्वत्तः श्रुत्वैव राघवः ।
पराक्रमविधिं वीरो विधिवत् संविधास्यति ॥

[१३] सीतायास्तद्वचः श्रुत्वा मारुतिर्हरिसत्तमः ।
शिरस्यञ्जलिमाधाय हनुमान् वाक्यमब्रवीत् ॥

[१४] क्षिप्रमेष्यति काकुत्स्थो हर्यक्षप्रवरैर्वृतः ।
यस्ते युधि विजित्यारीञ्छोकं व्यपनयिष्यति ॥

[१५] न हि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा ।
यस्तस्य क्षिपतो बाणान् स्थातुमुत्सहतेऽग्रतः ॥

[१६] अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् ।
स हि सोढुं रणे शक्तः तव हेतोर्विशेषतः ॥

[१७] स हि सागरपर्यन्तां महीं शासितुमीहते ।
त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि ॥

[१८] तस्य तद्वचनं श्रुत्वा सम्यक् सत्यं सुभाषितम् ।
जानकी बहुमेनेऽथ वचनं चेदमब्रवीत् ॥

[१९] ततस्तं प्रस्थितं सीता वीक्षमाणा पुनःपुनः ।
भर्तृस्नेहान्वितं वाक्यं सौहार्दादन्वमानयत् ॥

[२०] यदि वा मन्यसे वीर वसैकाहमरिन्दम ।
कस्मिंश्चित् संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥

[२१] मम चेदल्पभाग्यायाः सान्निध्यात्तव वानर ।
अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥

[२२] गते हि हरिशार्दूल पुनरागमनाय तु ।
प्राणानामपि सन्देहो मम स्यान्नात्र संशयः ॥

[२३] तवादर्शनजः शोको भूयो मां परितापयेत् ।
दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर ॥

[२४] अयं च वीर सन्देहस्तिष्ठतीव ममाग्रतः ।
सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वराः ॥

[२५] कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ।
तानि हर्यृक्षसैन्यानि तौ वा दशरथात्मजौ ॥

[२६] त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ।
शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥

[२७] एतस्मिन् कार्यनिर्योगे वीरैवं दुरतिक्रमे ।
किं पश्यसि समाधानं त्वं हि कार्यविदां वरः ॥

[२८] काममस्य त्वमेवैकः कार्यस्य परिसाधने ।
पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः ॥

[२९] बलैः समग्रैर्यदि मां रावणं जित्य संयुगे ।
विजयी स्वपुरीं यायात्तन्मे तस्य यशस्करम् ॥

[३०] शरैस्तु सङ्कुलां कृत्वा लङ्कां परबलार्दनः ।
मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥

[३१] तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ।
भवेदाहवशूरस्य तथा त्वमुपपादय ॥

[३२] तदर्थोपहितं वाक्यं प्रश्रितं धर्मसंहितम् ।
निशम्य हनुमान् शेषं वाक्यमुत्तरमब्रवीत् ॥

[३३] देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः ।
सुग्रीवः सत्त्वसम्पन्नस्तवार्थे कृतनिश्चयः ॥

[३४] स वानरसहस्राणां कोटीभिरभिसंवृतः ।
क्षिप्रमेष्यति वैदेहि राक्षसानां निबर्हणः ॥

[३५] तस्य विक्रमसम्पन्नाः सत्त्ववन्तो महाबलाः ।
मनःसङ्कल्पसम्पन्ना निदेशे हरयः स्थिताः ॥

[३६] येषां नोपरि नाधस्तान्न तिर्यक् सज्जते गतिः ।
न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥

[३७] असकृत्तैर्महोत्साहैः ससागरधराधरा ।
प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥

[३८] मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ।
मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥

[३९] अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ।
न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥

[४०] तदलं परितापेन देवि शोको व्यपैतु ते ।
एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥

[४१] मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ।
त्वत्सकाशं महासत्त्वौ नृसिंहावागमिष्यतः ॥

[४२] तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ ।
आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥

[४३] सगणं रावणं हत्वा राघवो रघुनन्दनः ।
त्वामादाय वरारोहे स्वां पुरीं प्रति यास्यति ॥

[४४] तदाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ।
अचिराद्द्रक्ष्यसे रामं प्रज्वलन्तमिवानलम् ॥

[४५] निहते राक्षसेन्द्रेऽस्मिन् सपुत्रामात्यबान्धवे ।
त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥

[४६] क्षिप्रं त्वं देवि शोकस्य पारं यास्यसि मैथिलि ।
रावणं चैव रामेण निहतं द्रक्ष्यसेऽचिरात् ॥

[४७] एवमाश्वास्य वैदेहीं हनुमान् मारुतात्मजः ।
गमनाय मतिं कृत्वा वैदेहीं पुनरब्रवीत् ॥

[४८] तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् ।
लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम् ॥

[४९] नखदंष्ट्रायुधान् वीरान् सिंहशार्दूलविक्रमान् ।
वानरान् वारणेन्द्राभान् क्षिप्रं द्रक्ष्यसि सङ्गतान् ॥

[५०] शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ।
नर्दतां कपिमुख्यानामार्ये यूथान्यनेकशः ॥

[५१] स तु मर्मणि घोरेण ताडितो मन्मथेषुणा ।
न शर्म लभते रामः सिंहार्दित इव द्विपः ॥

[५२] मा रुदो देवि शोकेन मा भूत्ते मनसोऽप्रियम् ।
शचीव पत्या शक्रेण भर्त्रा नाथवती ह्यसि ॥

[५३] रामाद्विशिष्टः कोऽन्योऽस्ति कश्चित् सौमित्रिणा समः ।
अग्निमारुतकल्पौ तौ भ्रातरौ तव संश्रयौ ॥

[५४] नास्मिंश्चिरं वत्स्यति देवि देशे
रक्षोगणैरध्युषितेऽतिरौद्रे ।
न ते चिरादागमनं प्रियस्य
क्षमस्व मत्सङ्गमकालमात्रम् ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे
एकोनचत्वारिंशः सर्गः ॥

## परिशीलनम् ।

१. "स तथेति प्रतिज्ञाय" तथेत्युक्तप्रकारः कीदृशः ?

२. "बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ।" किमब्रवीत् ?

३. "शिरस्यञ्जलिमाधाय हनुमान् वाक्यमब्रवीत् ।" हनुमद्वाक्यं सङ्गृह्णीत ।

४. "जानकी बहुमेनेऽथ वचनं चेदमब्रवीत् ।" किं तद्वचनम् ?

५. "एवमाश्वास्य वैदेहीम्" आश्वासनप्रकारः कीदृशः ?

## तृतीयः पाठः

# दमयन्तीबाहुकयोर्वार्तालापः ।

[दमयन्त्याः द्वितीयस्वयंवरार्थमागतस्य ऋतुपर्णमहाराजस्य सूतं बाहुकं भैम्या आदेशेन केशिनीनाम्नो दूती बहुधा परीक्ष्य, तत्फलं न्यवेदयादित्येतत् प्रकृतम् ।]

### बृहदश्व उवाच

[१] सर्वं कारं विदृष्ट्वा तु पुण्यश्लोकस्य धीमतः ।
आगत्य केशिनी सर्वं दमयन्त्यै न्यवेदयत् ॥

[२] दमयन्ती ततो भूयः प्रेषयमास केशिनीम् ।
मातुः सकाशं दुःखार्ता नलदर्शनकाङ्क्षया ॥

[३] परीक्षितो मे बहुशो बाहुको नलशङ्कया ।
रूपे मे संशयस्त्वेकः स्वयमिच्छामि वेदितुम् ॥

[४] स वा प्रवेश्यतां मातर्मां वानुज्ञातुमर्हसि ।
विदितं वाथवा ज्ञातं पितुर्मे संविधीयताम् ॥

[५] एवमुक्ता तु वैदर्भ्या सा देवी भीममब्रवीत् ।
दुहितुस्तमभिप्रायमन्वजानात् स पार्थिवः ॥

[६] सा वै पित्राभ्यनुज्ञाता मात्रा च भरतर्षभ ।
नलं प्रवेशयामास यत्र तस्याः प्रतिश्रयः ॥

[७] तां स्म दृष्ट्वैव सहसा दमयन्तीं नलो नृपः ।
आविष्टः शोकदुःखाभ्यां बभूवाश्रुपरिप्लुतः ॥

[८] तं तु दृष्ट्वा तथायुक्तं दमयन्ती नलं तदा ।
तीव्रशोकसमाविष्टा बभूव वरवर्णिनी ॥

[९] ततः काषायवसना जटिला मलपङ्किनी ।
दमयन्ती महाराज बाहुकं वाक्यमब्रवीत् ॥

[१०] पूर्वं दृष्टस्त्वया कच्चिद् धर्मज्ञो नाम बाहुकः ।
सुप्तामुत्सृज्य विपिने गतो यः पुरुषः स्त्रियम् ॥

[११] अनागसं प्रियां भार्यां विजने श्रममोहिताम् ।
अपहाय तु को गच्छेत् पुण्यश्लोकमृते नलम् ॥

[१२] किमु तस्य मया बाल्यादपराद्धं महीपतेः ।
यो मामुत्सृज्य विपिने गतवान् निद्रयार्दिताम् ॥

[१३] साक्षाद्देवानपाहाय वृतो यः स पुरा मया ।
अनुव्रतां साभिकामां पुत्रिणीं त्यक्तवान् कथम् ॥

[१४] अग्नौ पाणिं गृहीत्वा तु देवानामग्रतस्तथा ।
भविष्यामीति सत्यं तु प्रतिश्रुत्य क्व तद् गतम् ॥

[१५] दमयन्त्या ब्रुवन्त्यास्तु सर्वमेतदरिन्दम ।
शोकजं वारि नेत्राभ्यामसुखं प्रास्रवद् बहु ॥

[१६] अतीव कृष्णताराभ्यां रक्तान्ताभ्यां जलं तु तत् ।
परिस्रवन्नलो दृष्ट्वा शोकार्त्तामिदमब्रवीत् ॥

[१७] मम राज्यं प्रणष्टं यन्नाहं तत् कृतवान् स्वयम् ।
कलिना तत् कृतं भीरु यच्च त्वामहमत्यजम् ॥

[१८] यत् त्वया धर्मकृच्छ्रे तु शापेनाभिहतः पुरा ।
वनस्थया दुःखितया शोचन्त्या मां दिवानिशम् ॥

[१९] स मच्छरीरे त्वच्छापाद्दह्यमानोवसत् कलिः ।
त्वच्छापदग्धः सततं सोऽग्नावग्निरिवाहितः ॥

[२०] मम च व्यवसायेन तपसा चैव निर्जितः ।
दुःखस्यान्तेन चानेन भवितव्यं हि नौ शुभे ॥

[२१] विमुच्य मां गतः पापस्ततोऽहमिह चागतः ।
त्वदर्थं विपुलश्रोणि न हि मेऽन्यत् प्रयोजनम् ।

[२२] कथं नु नारी भर्त्तारमनुरक्तमनुव्रतम् ।
उत्सृज्य वरयेदन्यं यथा त्वं भीरु कर्हिचित् ॥

[२३] दूताश्चरन्ति पृथिवीं कृत्स्नां नृपतिशासनात् ।
भैमी किल स्म भर्त्तारं द्वितीयं वरयिष्यति ॥

[२४] स्वैरवृत्ता यथाकाममनुरूपमिवात्मनः ।
श्रुत्वैव चैवं त्वरितो भाङ्गासुरिरुपस्थितः[1] ॥

[२५] दमयन्ती तु तच्छ्रुत्वा नलस्य परिदेवितम् ।
प्राञ्जलिर्वेपमाना च भीता वचनमब्रवीत् ॥

---

1. भाङ्गासुरिः = ऋतुपर्णः ।

## दमयन्त्युवाच

[२६] न मामर्हसि कल्याणं दोषेण परिशङ्कितुम् ।
मया हि देवानुत्सृज्य वृतस्त्वं निषधाधिप ॥

[२७] तवाभिगमनार्थं तु सर्वतो ब्राह्मणा गताः ।
वाक्यानि मम गाथाभिर्गायमाना दिशो दश ॥

[२८] ततस्त्वां ब्राह्मणो विद्वान् पर्णादो नाम पार्थिव ।
अभ्यगच्छत् कौसलायामृतुपर्णनिवेशने ॥

[२९] तेन वाक्ये कृते सम्यक् प्रतिवाक्ये तथाऽहृते ।
उपायोऽयं मया दृष्टो नैषधानयने तव ॥

[३०] त्वामृते नहि लोकेऽन्य एकाह्ना पृथिवीपते ।
समर्थो योजनशतं गन्तुमश्वैर्नराधिप ॥

[३१] स्पृशेयं तेन सत्येन पादावेतौ महीपते ।
यथा नासत्कृतं किञ्चिन्मनसापि चराम्यहम् ॥

[३२] अयं चरति लोकेऽस्मिन् भूतसाक्षी सदागतिः ।
एष मे मुञ्चतु प्राणान् यदि पापं चराम्यहम् ॥

[३३] यथा चरति तिग्मांशुः परेण भुवनं सदा ।
स मुञ्चतु मम प्राणान् यदि पापं चराम्यहम् ॥

[३४] चन्द्रमाः सर्वभूतानामन्तश्चरति साक्षिवत् ।
स मुञ्चतु मम प्राणान् यदि पापं चराम्यहम् ॥

[३५] एते देवास्त्रयः कृत्स्नं त्रैलोक्यं धारयन्ति वै ।
विब्रुवन्तु यथा सत्यमेतद् देवास्त्यजन्तु माम् ॥

[३६] एवमुक्तस्तया वायुरन्तरिक्षादभाषत ।
नैषा कृतवती पापं नल सत्यं ब्रवीमि ते ॥

[३७] राजन् शीलनिधिः स्फीतो दमयन्त्या सुरक्षितः ।
साक्षिणो रक्षिणश्चास्य वयं त्रीन् परिवत्सरान् ॥

[३८] उपायो विहितश्चायं त्वदर्थमतुलोऽनया ।
नह्येकाह्ना शतं गन्ता त्वामृतेऽन्यः पुमानिह ॥

[३९] उपपन्ना त्वया भैमी त्वं च भैम्या महीपते ।
नात्र शङ्का त्वया कार्या सङ्गच्छ सह भार्यया ॥

[४०] तथा ब्रुवति वायौ तु पुष्पवृष्टिः पपात ह ।
देवदुन्दुभयो नेदुर्ववौ च पवनः शिवः ॥

[४१] तदद्भुतमयं दृष्ट्वा नलो राजा च भारत ।
दमयन्त्या विशङ्कां तामुपाकर्षदरिन्दमः ॥

[४२] ततस्तद्वस्त्रमजरं प्रावृणोद्वसुधाधिपः ।
संस्मृत्य नागराजं तं ततो लेभे स्वकं वपुः ॥

[४३] स्वरूपिणं तु भर्त्तारं दृष्ट्वा भीमसुता तदा ।
प्राक्रोशदुच्चैरालिङ्गय पुण्यश्लोकमनिन्दिता ॥

[४४] भैमीमपि नलो राजा भ्राजमानो यथा पुरा ।
सस्वजे स्वसुतौ चापि यथावत् प्रत्यनन्दत ॥

[४५] ततः स्वोरसि विन्यस्य वक्त्रं तस्य शुभानना ।
परीता तेन दुःखेन निशश्वासायतेक्षणा ॥

[४६] तथैव मलदिग्धाङ्गीं परिष्वज्य शुचिस्मिताम्
सुचिरं पुरुषव्याघ्रस्तस्थौ शोकपरिप्लुतः ॥

[४७] ततः सर्वं यथा वृत्तं दमयन्त्या नलस्य च ।
भीमायाकथयत् प्रीत्या वैदर्भ्या जननी नृप ॥

[४८] ततोऽब्रवीन्महाराजः कृतशौचमहं नलम् ।
दमयन्त्या सहोपेतं कल्ये द्रष्टा सुखोषितम् ॥

[४९] ततस्तौ सहितौ रात्रिं कथयन्तौ पुरातनम् ।
वने विचरितं सर्वमूषतुर्मुदितौ नृपः ॥

[५०] गृहे भीमस्य नृपतेः परस्परसुखैषिणौ ।
वसेतां हृष्टसङ्कल्पो वैदर्भी च नलश्च ह ॥

[५१] स चतुर्थे ततो वर्षे सङ्गम्य सह भार्यया ।
सर्वकामैः सुसिद्धार्थो लब्धवान् परमां मुदम् ॥

[५२] दमयन्त्यपि भर्त्तारमासाद्याप्यायिता भृशम् ।
अर्धसञ्जातसस्येव तोयं प्राप्य वसुन्धरा ॥

[५३] सैवं समेत्य व्यपनीय तन्द्रां
शान्तज्वरा हर्षविवृद्धसत्त्वा ।
रराज भैमी समवाप्तकामा
शीतांशुना रात्रिरिवोदितेन ॥

इति श्रीमहाभारते वनपर्वणि नलोपाख्यानपर्वणि नलदमयन्तीसमागमे षट्सप्ततितमोऽध्यायः ॥

## परिशीलनम् ।

१. बाहुकस्य दमयन्त्याः च समागमः कथं जात इति वदत ।

२. " दमयन्ती महाराज बाहुकं वाक्यमब्रवीत् " । दमयन्त्या किमुक्तमिति ब्रूत ।

३. बाहुकः दमयन्तीपरित्यागे किं कारणं ब्रूते ?

४. बाहुकः दमयन्तीं कथं दूषयति ?

५. नलस्य दमयन्तीमधिकृत्य सञ्जाता दोषाशङ्का कथमपगतेति विशदीकुरुत ।

चतुर्थः पाठः

# इन्द्रजालप्रयोगः ।

पुरा विक्रमार्को नाम महाराजः चतुरुदधिमेखलां भुवं बभार। तदात्वे प्रजाः सर्वाः क्षेमसम्पूर्णाः धर्मनिरताः सन्तुष्टाश्चाभूवन्। एवं स्थिते कस्मिंश्चिद्दिवसे प्राभातिकस्नानादीनि नित्यकर्माण्याचरितवान् राजा सकलसामन्तादिभिः सामाजिकैः सह सिंहासनमधिरुह्य स्थितः, पूर्वेद्युरागतम् ऐन्द्रजालिकम् इन्द्रजालप्रयोगलाघवं दिदृक्षुः आजुहाव ॥

सद्य एव दक्षिणकरेण कृपाणमितरेण तरुणीरत्नं च गृह्णन्नुन्नतकायो दीर्घश्मश्रुः कवचधारी देदीप्यमानः कश्चन वीरपुरुषः प्रविश्य नरपतेः पुरतः स्थित्वा प्रोवाच। "महाराज! सुरपतिविप्रोषितोऽहमिदानीं धरणीतलमधिवसामि। इयं च रमणी मे पाणिगृहीती। विक्रमो राजा च परनारीसहोदर इति चानेन श्रुतपूर्वम्। सम्प्रति च सुरलोके देवासुरयुद्धं प्रवृत्तमिति श्रूयते। तन्नूनमिन्द्रसाहय्यार्थं तत्र मे गन्तव्यमस्ति। तस्मादेनां न्यासतया श्रीमतां निकटे समर्पयामि" इति। राजा च विस्मयपरवशोऽपि आश्रितसंरक्षणं स्वधर्म इति कृत्वा कथञ्चिदन्वमंस्त ॥

तत्क्षणमेवैन्द्रजालिको गगनमुद्भ्रम्य, क्रमेणादृश्यो बभूव। तदानीं वियति "अरे रे मारय, घातय, प्रहर, गृहाण, बधान, क्वासिः, क्व शूलम्, क्व धनुः, इत्यादयः शब्दा अश्रूयन्त। समेऽपि

सामाजिका विस्मयमाना गगनमुदैक्षिषत। सहसैव तेषां पुरतः सहासिर्हस्तो दृष्टपूर्वकल्पः पपात। तं दृष्ट्वा ततो गतं समरवीरं मृतमुत्प्रैक्षन्त। तदनन्तरमेवैकं शिरस्तदनु कबन्धश्च पेततुः॥

एवञ्च वीरमरणे निर्णीते सति सामात्यसामाजिके राजनि दूयमाने वीरवनिता राजानमुपगम्य, अवादीत्। "भोः महाराज! सम्प्रति वीरवरमरणं सुनिश्चितम्। यावदमर्त्यो मत्प्राणनाथं न वृणीरन्, तावदहं तन्निकटं जिगमिषामि। तद्देहि मे वैश्वानरं वीरवनिताभिः अनुस्रियमाणम् अनुमरणं कर्तुम्" इति॥

"अयि वीरपत्नि! सुन्दरी! परिरक्ष स्वशरीरम्, मदीयां पुत्रीमिव भवतीं परिपालयेयमित्ययमहं ब्रवीमि" इत्येवं बहुधा राज्ञा समाश्वासिताप्यननुमन्यमाना सा नारी, यस्य कृतेऽस्य शरीरस्य परिरक्षा क्रियते, सोऽयं वीर इमां दशामश्नाति, तन्नोत्सहे प्राण-सन्धारणाय। "प्रमदाः पतिवर्त्मगाः" इति सुप्रसिद्धं खलु? तत्प्रदेहि मे जातवेदसमिति राजानं निर्बबन्ध। एतच्छ्रुत्वा नृपतिरनिच्छन्नपि श्रीखण्डादिभिश्चितां कारयित्वाग्निं प्रज्वलयामास। ज्वलितमात्रे च ज्वलने वनिता सा तन्मध्ये पतिता सती पतिमन्वगात्॥

अपरेद्युः प्रातरास्थानमण्डपास्थितस्य सपरिवारस्य राज्ञः पुरतः गगनादवतीर्ण ऐन्द्रजालिकस्तं प्रणम्य मन्दारमालां सुरेन्द्रप्रेषितां राज्ञः कण्ठे समर्प्यावोचत्। "मयीतो गत्वा स्वर्गं प्राप्तवति, देवासुरयोर्मिथः शस्त्राशस्त्रि केशाकेशि च तुमुलं युद्धं प्रवृत्तमासीत्।

तत्र च दानवारीणां पराजये प्रत्यासन्ने सावसरोऽहम् अतिद्रुतम् इन्द्रारिनायकम् अवधिषम्। अन्ये सर्वे कान्दिशीकाश्चाभूवन्। रणनिपुणतामिमां दृष्ट्वा सन्तुष्टो महेन्द्रः स्वहस्तविभूषितं महारत्न-खचितमिदं कङ्कणमुन्मुच्यास्मिन् करे पिनह्य अप्राक्षीत्। हे वीर! त्वमिदानीं कुतः समायातः? कुत्रासी? इति। स्वामिना विप्रोषितोऽहं भुवि विक्रमराज्ये वसामि। युद्धवार्त्तामाकर्ण्य स्वामिसाहाय्यकरणं मम धर्मः इति कृत्वा साम्प्रतमागतमिति मया प्रत्युक्तम्। तदा, "इतः परमत्रैवोष्यताम्। मा लोकान्तरं गमः। अहमतीव सन्तुष्टोऽस्मि" इति ब्रुवाणं पुलोमजापतिं विक्रमनिकटे निक्षिप्तां मद्‌गृहिणीं गृहीत्वा आगमिष्यामि इत्यब्रवम्॥

तदा त्रिलोकैकवीराय विक्रमाय मया दीयमानैषा मन्दारमाला देयेत्युक्त्वाऽमरपतिर्गन्तुम् अन्वमंस्त। आदिदेश चाचिरात् पुनरागमनाय। राजन्! सैषा मन्दारमाला तव कण्ठे समर्पिता। मयि चिरायति महेन्द्रस्य संशीतिर्जायेत। तत् क्व मे धर्मगृहिणीति ऐन्द्रजालिके भणति, विक्रमस्तूष्णीम्भावमवालम्बत। ऐन्द्रजालिकः पप्रच्छ। राजन् किं जोषमास्ते भवानिति। तदा कश्चित् सामाजिकः प्राह--"युष्मद्‌गृहिणी पतिमरणं मन्वाना कृशानौ निपतिता" इति॥

ऐन्द्रजालिको ब्रूते स्म—"भो भो विक्रमनरवर! अर्थि-जनकल्पतरो परदारसहोदर किमर्थमस्मज्जायामन्तःपुरे परिरक्षैवं मौनी भवसि? एतेषां कृशानुप्रवेशकथा च किमर्था"? इति॥

तदा राज्ञा पृष्टैः सौविदल्लैः अन्तःपुरे महिष्या समं सल्लपन्ती सुखमास्ते एतस्य पत्नीति निवेदिते सति, सभेऽपि सामाजिका अतीव विसिस्मियिरे। तावदैन्द्रजालिकः प्राह—मयैतदिन्द्रजाल-प्रयोगलाघवं प्रदर्शितम्। तन्मा वृथा व्यथस्व राजन्निति। एतस्मिन्नन्तरे भाण्डागारिक आगत्य करत्वेन पाण्ड्यराजप्रेषितं हाटककोट्यादिवस्तुजातं राज्ञे न्यवेदयत्। तत् सर्वमैन्द्रजालिकाय दीयतामिति राज्ञाज्ञप्तम्॥

भो राजन्! एतादृशमौदार्यं त्वयि विद्यते चेत् एतत् सिंहासनमारोहतु भवानिति विक्रमसिंहासनमारोढुमुपागतं भोजराजं सालभञ्जिकाऽब्रवीत्! तच्छ्रुत्वा मौनी भूत्वा राजा प्रतिन्यवर्तत॥

## परिशीलनम्।

१. राज्ञः पुरतः स्थित्वैन्द्रजालिकः किमभाषत?

२. वीरो मृत इति कथं निर्णीतम्?

३. भर्तारं मृतं मन्यमाना न्यासभूता वनिता किमकरोत्?

४. स्वर्गात् प्रत्यागत ऐन्द्रजालिकः स्वर्गगमनानन्तरकथां कथं विवृणोति?

५. अग्नौ प्रविष्टां नारीं पुनः कुतोऽलभत?

६. राज्ञा औदार्यं कीदृशम् ?

७. " ज्वलितमात्रे च ज्वलने वनिता सा तन्मध्ये पतिता सती पतिमन्वगात् ।" सतिसप्तम्याः स्थाने " यदा तदा " इति प्रयुज्यताम् ।

८. " सहसैव तेषां पुरतः सहासिर्हस्तो दृष्टपूर्वकल्पः पपात । तं दृष्ट्वा ततो गतं समरवीरं मृतमुत्प्रैक्षन्त ।" एकवाक्यं कुरुत ।

९. विगृह्णीत—

(१) दिदृक्षुः, (२) देदीप्यमानः, (३) श्रुतपूर्वम्, (४) सहाय्यार्थम्, (५) सामाजिकाः, (६) दृष्टपूर्वकल्पः, (७) जिगमिषामि, (८) शस्त्राशस्त्रि, (९) केशाकेशि, (१०) ज्वलितमात्रे ।

१०. समस्यन्ताम् —

(१) महान् + इन्द्रः, (२) भोजानां + राजा, (३) अस्माकं + जाया ।

११. व्याकरणकार्याणि वदत—

(१) धरणीतलम् अधिवसति, (२) देहि मे वैश्वानरम् ।

१२. पदानि सन्धत्त—

(१) गृह्णन् + उन्नतकायः, (२) सहोदरः + इति, (३) तद् + न + उत्सहे, (४) कौमुदी + इव, (५) सन्तुष्टः + अस्मि ।

पञ्चमः पाठः

# उपमन्योर्गुरुभक्तिः ।

धौम्यो नाम कश्चिदृषिरासीत्। तस्य आरुणिः, उपमन्युः, वेदश्चेति त्रयः शिष्याः बभूवुः। तेष्वारुणेर्गुरुभक्तिं परीक्ष्य सन्तुष्टेन उपाध्यायेनानुगृह्य इष्टं देशं स विसृष्टः। अथापरस्य शिष्यस्योपमन्योः गुरुभक्तेः परीक्षाप्रकारमाह—

अथापरः शिष्यस्तस्यैव धौम्यस्योपमन्युर्नाम। तं चोपाध्यायः, प्रेषयामास "वत्स! उपमन्यो गा रक्ष" इति। स उपाध्यायवचनादरक्षद् गाः। स चाहनि गाः रक्षित्वा दिवसक्षये गुरुगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायः पीवानमपश्यत्। उवाच चैवं "वत्स! उपमन्यो केन वृत्तिं कल्पयसि। पीवानसि दृढम्" इति। स उपाध्यायं प्रत्युवाच। "भो भैक्ष्येण वृत्तिं कल्पयामि" इति। तमुपाध्यायः प्रत्युवाच। "मय्यनिवेद्य भैक्ष्यं नोपयोक्तव्यम्" इति। स तथेत्युक्त्वा भैक्ष्यं चरित्वोपाध्यायं न्यवेदयत्। स तस्मादुपाध्यायः सर्वमेव भैक्ष्यमगृह्णात्। उवाच च प्रत्यहं भैक्ष्यं मह्यमुपहर इति। स तथेत्युक्त्वा पुनररक्षद् गाः। अहनि रक्षित्वा निशामुखे गुरुकुलमागम्य गुरोरग्रतः स्थित्वा नमः चक्रे॥

तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वोवाच। "वत्स! उपमन्यो सर्वमशेषतस्ते भैक्ष्यं गृह्णामि। केनेदानीं वृत्तिं कल्पयसि"

इति। स एवमुक्त्वा उपाध्यायं प्रत्युवाच। "भगवते निवेद्य पूर्वमपरं चरामि। तेन वृत्तिं कल्पयामि" इति। तमुपाध्यायः प्रत्युवाच। "नैषा न्याय्या गुरुवृत्तिः। अन्येषामपि भैक्ष्योऽपजीविनां वृत्त्युपरोधं करोषि इत्येवं वर्त्तमाने लुब्धोऽसि" इति॥

स तथेत्युक्त्वा गा अरक्षत्। रक्षित्वा च पुनरुपाध्याय-गृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच। "वत्स, उपमन्यो अहं ते सर्वं भैक्ष्यं गृह्णामि। न चान्यच्चरसि। पीवानसि भृशम्। केन वृत्तिं कल्पयसि" इति॥

स एवमुक्तस्तमुपाध्यायं प्रत्युवाच। "भो एतासां गवां पयसा वृत्तिं कल्पयामि" इति। तमुवाचोपाध्यायः "नैतन्न्याय्यं पय उपयोक्तुं भवतो मया नाभ्यनुज्ञातम्" इति। स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायगृहमेत्य गुरोरग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायः पीवानमेव दृष्ट्वोवाच। 'वत्स! उपमन्यो भैक्ष्यं नाश्नासि, न चान्यच्चरसि, पयो न पिबसि, पीवानसि भृशम्। केनेदानीं वृत्तिं कल्पयसि" इति॥

स एवमुक्त उपाध्यायं प्रत्युवाच। "भो फेनं पिबामि। यमिमे वत्सा मातृणां स्तनात् पिबन्त उद्गिरन्ति"। तमुपाध्यायः प्रत्युवाच। "एते त्वदनुकम्पया गुणवन्तो वत्साः प्रभूततरं फेनमुद्गिरन्ति। तदेषामपि वत्सानां वृत्त्युपरोधं करोष्येवं वर्तमानः। फेनमपि भवान् न पातुमर्हति" इति। स तथेति प्रतिश्रुत्य पुनररक्षद् गाः॥

तथा प्रतिषिद्धो भैक्ष्यं नाश्नाति, न चान्यच्चरति, पयो न पिबति, फेनं नोपभुङ्क्ते। स कदाचिदरण्ये क्षुधार्तोऽर्क-पत्राण्यभक्षयत्। स तैरर्कपत्रैः भक्षितैः क्षारतिक्तकटुरूक्षैः तीक्ष्ण-विपाकैः चक्षुष्युपहतः अन्धो बभूव। ततः सोऽन्धोऽपि चङ्क्रम्यमाणः कूपे पपात ॥

अथ तस्मिन्ननागच्छति सूर्ये चास्ताचलावलम्बिनि उपाध्यायः शिष्यानवोचत्। "नायात्युपमन्युः।" त ऊचुः। "वनं गतो गा रक्षितुम्" इति। तानाहोपाध्यायः, "मयोपमन्युः सर्वतः प्रतिषिद्धः नियतं कुपितः। ततो नागच्छति चिरम्। ततोऽन्वेष्यः" इत्येवमुक्त्वा शिष्यैः सार्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार। "भो उपमन्यो क्वासि? वत्सैहि" इति। स उपाध्यायवचनं श्रुत्वा प्रत्युवाचोच्चैः "अयमस्मिन् कूपे पतितोऽहम्" इति। तमुपाध्यायः प्रत्युवाच। "कथं त्वमस्मिन् कूपे पतितः" इति। स उपाध्यायं प्रत्युवाच। "अर्कपत्राणि भक्षयित्वा अन्धीभूतोऽस्मि। अतः कूपे पतितः" इति। तमुपाध्यायः प्रत्युवाच। "अश्विनौ स्तुहि, एतौ देवभिषजौ त्वां चक्षुष्मन्तं कर्तारौ" इति। स एव-मुक्त उपाध्यायेनोपमन्युरश्विनौ स्तोतुमुपचक्रमे वाग्भिर्ऋग्भिः।

स्तोतुं न शक्नोमि गुणैर्भवन्तौ
चक्षुर्विहीनः पथि सम्प्रमोहः।
दुर्गेऽहमस्मिन् पतितोऽस्मि कूपे
युवां शरण्यौ शरणं प्रपद्ये ॥

इत्येवं तेनाभिष्टुतावश्विनावाजग्मतुराहतुश्चैनम्। "प्रीतौ स्वः एष तेऽपूपः, अशानैनम्" इति। स एवमुक्तः प्रत्युवाच।

"नानृतमूचतुर्भगवन्तौ। न त्वहमेतमपूपमुपयोक्तुमुत्सहे गुरवेऽनिवेद्य" इति। ततस्तावश्विनावूचतुः। "आवाभ्यां पुरस्ताद् भवत उपाध्यायेनैवमेवाभिष्टुताभ्यामपूपो दत्तः। उपयुक्तः स तेनानिवेद्य गुरवे। त्वमपि तथैव कुरुष्व, यथा कृतमुपाध्यायेन" इति। स एवमुक्तः प्रत्युवाच। "एतत् प्रत्यनुनये भवन्तावश्विनौ, नोत्सहेऽहमनिवेद्य गुरवेऽपूपमुपयोक्तुम्" इति। तमश्विनावाहतुः। "प्रीतौ स्वः तवानया गुरुभक्त्या। उपाध्यायस्य ते कार्ष्णायसा दन्ताः" भवतोऽपि हिरण्मया भविष्यन्ति। चक्षुष्मांश्च भविष्यसि, श्रेयश्चावाप्स्यसि" इति॥

स एवमुक्तोऽश्विभ्यां लब्धचक्षुः उपाध्यायसकाशम् आगम्य अभ्यवादयत्। आचचक्षे च। स चास्य प्रीतिमान् बभूव। आह चैनं यथाश्विनावाहतुस्तथा "त्वं श्रेयोऽवाप्स्यसि। सर्वे च वेदाः प्रतिभास्यन्ति, सर्वाणि च धर्मशास्त्राणि" इति॥

## परिशीलनम्।

१. उपमन्योरेकैकापि वृत्तिर्गुरुणा कथं प्रतिषिद्धा?

२. उपमन्योरन्धत्वं पुनश्चक्षुष्मत्वं च कथं जातमिति वदत।

३. भिन्नवाक्यानि कुरुत—"स तथेति प्रतिज्ञाय, गा रक्षित्वा पुनरुपाध्यायगृहमेत्य, गुरोरग्रतः स्थित्वा, नमश्चक्रे"।

४. प्रयोगविपरिणामं कुरुत—

"एतौ देवभिषजौ च त्वां चक्षुष्मन्तं कर्त्तारौ"।

५. विगृह्णीत— (१) कार्ष्णायसाः, (२) हिरण्मयाः, (३) चक्षुष्मान्, (४) लब्धचक्षुः।

## षष्ठः पाठः

# मातलिप्रवेशः ।

[धीवरहस्तात् स्वनामधेयाङ्कितस्य अंगुलीयकस्य लाभेन शकुन्तलाविवाहस्य तत्परित्यागस्य च स्मरणात् पश्चात्तापेन दूयमानमानसः प्रमदवने स्थित्वा चित्ररचनादिविनोदेन दुःखभारं लघूकर्तुमुद्युञ्जानो दुष्यन्तः, अनपत्यस्य सार्थवाहस्य मरणवृत्तान्तश्रवणेन द्विगुणितपश्चात्तापोऽभवत्। तदनन्तरवृत्तं प्रकृतम्।]

[ततः प्रविशति पश्चात्तापसदृशवेषभाषणो राजा, प्रतीहारी च]

राजा— अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः।

कुतः—

अस्मात् परं बत यथाश्रुति सम्भृतानि
को नः कुले निवपनानि करिष्यतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति ॥

(मोहमुपगतः)

प्रतीहारी—(ससम्भ्रममवलम्ब्य) आश्वसित्वाश्वसितु भर्त्ता।

[नेपथ्ये]

अविहा, अविहा।

राजा—(कर्णं दत्वा) माढव्यस्येवार्तस्वरः। कः कोऽत्र भोः!

(प्रविश्य)

चतुरिका—परित्रायतां परित्रायतां देवः संशयगतं वयस्यम्।

राजा—केनार्तकण्ठो[1] माणवकः ।

चतुरिका—देव अदृष्टरूपेण केनापि सत्त्वेनाक्रम्य[2] गृहीत्वा मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः ।

राजा—(उत्थाय) मा तावत् । ममापि सत्त्वैरभिभूयन्ते गृहाः ।

अथवा,

अहन्यहन्यात्मन एव तावत्
ज्ञातुं प्रमादस्खलितं न शक्यम् ।
प्रजासु कः केन पथा प्रयाती-
त्यशेषतो वेदितुमस्ति शक्तिः ॥

(नेपथ्ये)

भो वयस्य अविहा, अविहा ।

राजा—(गतिभेदेन परिक्रामन्) सखे न भेतव्यं न भेतव्यम् ।

[ नेपथ्ये पुनस्तदेव पठित्वा ]

कथं न बिभेमि ? एष मां कोऽपि पश्चादवनतशिरोधरं इक्षुमिव तीक्ष्णभङ्गं करोति ।

राजा—(सदृष्टिक्षेपम्) धनुस्तावत् ।

---

1. आर्त्तकण्ठः=आर्त्तस्वरः ।

2. सत्त्वेन=भूतपिशाचादिष्वन्यतमेन ।

(प्रविश्य शार्ङ्गहस्ता)

यवनिका—भर्त्तः इदं सशरं शरासनं हस्तावापसहितम्[1] ।

राजा—(सशरं धनुरादत्ते)

(नेपथ्ये)

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्त्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम् ।

राजा—(सरोषम्) कथं मामेवोद्दिशति ? तिष्ठ तिष्ठ कुणपाशन । त्वमिदानीं भविष्यसि । (शार्ङ्गमारोप्य) वेत्रवति सोपान-मार्गमादेशय ।

प्रतीहारी—इत इतः ।

[सर्वे सत्वरमुपसर्पन्ति]

राजा—(समन्तादवलोक्य) शून्यं खल्विदम् ?

(नेपथ्ये)

अविहा, अविहा। अहमत्रभवन्तं पश्यामि । त्वं मां न पश्यसि । बिडालगृहीतो मूषिक इव निराशोऽस्मि जीविते संवृत्तः ।

राजा—भोस्तिरस्करिणीगर्वित मदीयमस्त्रं त्वां द्रक्ष्यति । एष तमिषुं सन्दधे ।

---

1. हस्तावापः=हस्तावरणम् ।

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥

(अस्त्रं च सन्धत्ते)

[ततः प्रविशति विदूषकमुत्सृज्य मातलिः विदूषकश्च]

मातलिः—

कृताः शरव्यं हरिणा तवासुराः ।
शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥

राजा—(अस्त्रमुपसंहरन् ) अये मातलिः । स्वागतं देवेन्द्रसारथये ।

विदूषकः—अहं येनेष्टिपशुमारं मारितः, सोऽमुना स्वागतेनाभिनन्द्यते ।

मातलिः—(सस्मितम् ) आयुष्मन्, यदस्मि हरिणा भवत्सकाशं प्रेषितः ।

राजा—अवहितोऽस्मि ।

मातलिः—अस्ति कालनेमिप्रभृतिर्दुर्जयो दानवगणः ।

राजा—श्रुतपूर्वं मया नारदात् ।

मातलिः—

सख्युस्ते स किल शतक्रतोरजय्य-
स्तस्य त्वं रणशिरसि स्मृतोऽसि हन्ता ।
उच्छेत्तुं प्रभवति यन्न सप्तसप्ति-
स्तन्नैशं तिमिरमपाकरोति चन्द्रः ॥

स भवानात्तशस्त्र एव इदानीमैन्द्रं रथमारुह्य विजयाय प्रतिष्ठताम् ।

राजा——अनुगृहीतोऽस्म्यनया मघवतः सम्भावनया । अथ माढव्यं प्रति भवता किमेवं कृतम् ?

मातलिः——किन्निमित्तादपि मनस्सन्तापादायुष्मान् मया विक्लबो दृष्टः, पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि ।

कुतः——

ज्वलति चलितेन्धनोऽग्नि-
 विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं
 कोपात् प्रतिपद्यते हि जनः ॥

राजा——युक्तमनुष्ठितं भवद्भिः । (जनान्तिकम्) वयस्य अनतिक्रमणीया दिवस्पतेराज्ञा । तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यमार्यपिशुनं ब्रूहित्वन्मतिः केवला तावत्परिपाल्यतु प्रजाः । अधिज्यमिदमन्यस्मिन् कर्मणि व्यापृतं धनुः ॥ इति ।

विदूषकः——यद् भवानाज्ञापयति । (निष्क्रान्तः)

मातलिः——इत इत आयुष्मान् ।

राजा——तथा । (रथारोहरणं नाटयति)

[निष्क्रान्ताः सर्वे]

## परिशीलनम्

१. दुष्षन्तस्य पिण्डभाजः कुतः संशयमारूढाः ?

२. मातलिर्माढव्ये किं कृतवान्, तथा करणस्य प्रयोजनं किमिति च विवृणुत।

३. दुष्षन्तः किमर्थं मातलिना स्वर्गं नीतः ?

४. आशयं विशदयत—

"हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः।"

५ व्याकरणकार्याणि ब्रूत —

(१) आत्तधन्वा, (२) प्रतिष्ठताम्, (३) सशरम्।

६. विग्रहं लिखत—

(१) अजय्यः, (२) शरव्यम्, (३) श्रुतपूर्वम्, (४) मदीयम्, (५) संशयगतम्।

७. प्रयोगविपरिणामः क्रियताम्—

"आयुष्मान् मया विक्लवो दृष्टः।"

सप्तमः पाठः

# उपहारवर्मलाभः ।

[महेश्वरानुगृहीतेन मालवनाथेन मानसारेण पराजितो मगधराजो राजहंसोऽन्तर्वत्त्या पत्न्या वसुमत्या अमात्यादिभिश्च सहितो, वामदेवर्षिणा वसुमतीसुतो राजवाहनोऽरातिमर्दनः स्यादित्युक्त्वा समाश्वासितो युद्धे स्वसहायभूतं मिथिलानायकं प्रहारवर्माणं चापश्यन् दुःखितः कञ्चित्कालं विन्ध्याटवीमध्यमध्यातिष्ठत् । तस्मात् एव राज्ञे राजहंसाय केनचित्तापसेन कुमारः समर्पित इत्युच्यते । ]

अथ कदाचिदेकेन तापसेन राजलक्षणविराजितं कञ्चिन्नयनानन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि । "भूवल्लभ, कुशसमिदानयनाय वनं गतेन मया काचिदशरण्या व्यक्तकार्पण्या अश्रु मुञ्चन्ती वनिता विलोकिता । " निर्जने वने किन्निमित्तं रुद्यते त्वया " इति पृष्टा सा करसरोरुहाभ्यामश्रु प्रमृज्य सगद्गदं मामवोचत्— "मुने लावण्यजितपुष्पसायके मिथिलानायके कीर्तिव्याप्तसुधर्मणि निजसुहृदो मगधराजस्य सीमन्तिनी[1]सीमन्तमहोत्सवाय पुत्रधारसमन्विते पुष्पपुरमुपेत्य कञ्चन कालमधिवसति, समाराधितगिरीशो मालवाधीशो मगधराजं योध्दुमभ्यगात् ॥

तत्र प्रख्यातयोरेतयोरसंख्ये संख्ये[2] वर्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति विदेहे विदेहेश्वरः प्रहारवर्मा जयवता

---

1. सीमन्तिनी वधूस्तस्याः सीमन्तमहोत्सवो गर्भिण्यवस्थायामनुष्ठातव्यस्य सीमन्तोन्नयनाख्यसंस्कारस्य उत्सवः । "चतुर्थे गर्भमासे सीमन्तोन्नयनम्"इति सूत्रम् । सीमन्तो यस्मिन् कर्मण्युन्नीयते तत् सीमन्तोन्नयनम् ।
2. संख्ये = युद्धे ।

रिपुणाभिगृह्य कारुण्येन पुण्येन विसृष्टो हतावशेषेण शून्येन सैन्येन सह स्वपुरगमनमकरोत्। ततो वनमार्गेण दुर्गेण[1] गच्छन्नधिकबलेन शबरबलेन रभसादभिहन्यमानो मूलबला[2]भिरक्षितावरोधः[3] स महानिरोधः पलायिष्ट। तदीयार्भकयोर्यमयो[4]र्धात्रीभावेन परिकल्पिताऽहं मद्दुहितापि तीव्रगतिं भूपतिमनुगन्तुमक्षमा अभूव॥

तत्र विवृतवदनः कोऽपि रूपी कोप इव व्याघ्रः शीघ्रं मामाघ्रातु[5]मागवतवान्। भीताहमुदग्रग्राव्[6]णि स्खलन्ती पर्यपतम्। मदीयपाणिभ्रष्टो बालः कस्यापि कपिला[7]शवस्य क्रोडम[8]भ्यलीयत[9]। तच्छवाकर्षिणोऽमर्षिणो व्याघ्रस्य प्राणान् बाणो बाणासनयन्त्रमुक्तोऽपाहरत्। विलोलालको बालकोऽपि शबरैरादाय कुत्रचिदुपानीयत।

कुमारमपरमुद्वहन्ती मद्दुहिता कुत्र गता न जाने। साहं मोहं गता केनापि कृपालुना वृष्णिपालेन[10] स्वकुटीर[11]मावेश्य विरोपितव्रणाभवम्। ततः स्वस्थीभूय भूयः क्ष्माभर्तुरन्तिकमुपतिष्ठासु[12]-

---

1. दुःखेन गन्तुं शक्यो दुर्गः तेन। 2. मूलबलम्=प्रधानसैन्यम्। 3. अवरोधः=शुद्धान्तः। 4. यमयोः=सहजातयोः। 5. आघ्रातुम् = नाशयितुम्। 6. उद्गतान्यग्राणि यस्य तादृशो ग्रावा तस्मिन्। 7. कपिला = गौः तस्याः शवः। 8. क्रोडम् = अङ्कदेशम्। 9. अभ्यलीयत = प्रच्छन्नोऽभूत्। 10. वृष्णिपालेन=मेषपालेन। 11. स्वकुटीरम्=स्वावासगृहम्। 12. उपतिष्ठासुः=उपस्थातुमिच्छुः।

रसहायतया दुहितुरनभिज्ञाततया च व्याकुलीभवामि।" इत्यभिदधाना "एकाकिन्यपि स्वामिनं गमिष्यामि" इति सा तदैव निरगात् ॥

अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवंस्तदन्वयाङ्कुरं[1] कुमारमन्विष्यंस्तदैकं चण्डिकामन्दिरं सुन्दरं प्रागाम् ॥

तत्र सन्ततमेवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराताः "महीरुहशाखावलम्बितमेनमसिलतया वा, सैकततले खननिक्षिप्तचरणं लक्ष्यीकृत्य शितशरनिकरेण वा कुक्कुरबालकैर्वा दंशयित्वा संहनिष्यामः" इति भाषमाणा मया समभ्यभाष्यन्त—"ननु किरातोत्तमाः घोरप्रचारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहम्। मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किञ्चिदन्तरमगच्छम्। स कुत्र गतः, केन वा गृहीतः, परीक्ष्यापि न वीक्ष्यते। तन्मुखावलोकनेन विना नैकान्यहान्यतीतानि। किं करोमि, क्व यामि भवद्भिर्न किमदर्शि?" इति ॥

"द्विजोत्तम कश्चिदत्र तिष्ठति। किमेष तव नन्दनः सत्यमेव, तदेनं गृहाण" इत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन्। तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य

1. अङ्कुरः=प्ररोहः।

निश्शङ्कं भवदङ्कं समानीतवानस्मि। एवमायुष्मन्तं पितृरूपो भवानभिरक्षतात् इति ॥

[राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किञ्चिदधरीकृत्य तमुपहारवर्मनाम्नाहूय राजवाहनमिव पुपोष ॥]

## परिशीलनम्।

१. मगधराजपुत्र्याः सीमन्तमहोत्सवाय गतस्य मिथिलानाथस्य कीदृशोऽनुभव आसीत्?

२. मिथिलानायकमनुधावन्त्याः धात्र्याः तत्करगतपुत्रस्य च किं संवृत्तम्?

३. कुमारं गृहीत्वा किराताः किमर्थमुदयुञ्जत?

४. तापसः कथं कुमारं सम्पादितवान्?

५. वनमध्ये तापसेन पृष्ठाया वनिताया उत्तरवचनानि सङ्गृह्य लिखत।

६. चत्वारि वाक्यानि कुरुत— "तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निश्शङ्कं भवदङ्कं समानीतवानस्मि "।

७. (१) "मयाश्रु, मुञ्चन्ती वनिता विलोकिता"। (२) "भवद्भिर्न किमदर्शि?" — अनयोर्यथाक्रमं कर्तरिप्रत्यय लकारौ प्रयुज्येताम्।

८. विगृह्यन्ताम् —

(१) अशरण्या, (२) उदग्रग्राविणि, (३) उपतिष्ठासुः, (४) दत्ताशीः, (५) अधरीकृत्य, (६) करसरोरुहाभ्याम्।

९. व्याकरणकार्याणि निर्दिश्यन्ताम्—

(१) कीर्त्तिव्यापृतसुधर्मणि, (२) स्खलितपथः, (३) मगधराजस्य, (४) कञ्चन कालमधिवसति, (५) सैन्येन सह।

१०. "निजबले सति विदेहे विदेहेश्वरः प्रहारवर्मा स्वपुरगमनमकरोत्"—सतिसप्तमीमपहाय यदा तदेति प्रयुज्यताम्।

## अष्टमः पाठः

# शुकनासोपदेशसारः ।

[विद्याभ्यासानन्तरं गुरुभिराशीर्वादपुरस्सरं विद्यागृहाद्गन्तुमनुमतं चन्द्रापीडं, तारापीडो विज्ञानमहासत्त्वतादीन् गुणांश्चाभिनन्द्य यौवराज्येऽभिषेक्तुं निरचैषीत्। अवसरेऽस्मिन् आत्मानं द्रष्टुमागतं चन्द्रापीडं वृद्धमन्त्री शुकनास उपदिशति]

समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन् शुकनासः सविस्तरमुवाच—"तात चन्द्रापीड विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवाभानुभेद्यमप्रदीपप्रभापनेयम् अतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टम्[1]अनञ्जनवर्त्ति[2]साध्यमपरमैश्वर्यतिमिरान्धत्वम्। इत्यतो विस्तरेणाभिधीयते।

गर्भेश्वरत्वम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वम्, अमानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अपहरति च वात्येव शुष्कपत्रं समुद्धूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये

---

1. कष्टम्=दुखास्पदम्। 2. अञ्जनवर्त्तिः=बिडालादिवसाञ्जनवर्त्तिः। तया तिमिरान्धत्वं विनश्यति। एतत्साध्यमपि नेत्यर्थः।

पुरुषं प्रकृतिः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। हरति च सकलमतिमलिनमप्यन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव गुरूपदेशः॥

गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्। असुवर्णविरचितम[1]ग्राम्यं[2] कर्णाभरणम्। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। उपदिश्यमानमपि ते न शृण्वन्ति। शृण्वन्तोऽपि गज[3]निमीलितेनावधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्। अहङ्कारविह्वला[4] हि राजप्रकृतिः॥

आलोकयतु तावल्लक्ष्मीमेव प्रथमम्। इयं हि लक्ष्मीः क्षीरसागराद् इन्दुशकलादेकान्तवक्रताम्[5], उच्चैःश्रवसश्चञ्चलतां[6], कालकूटान्मोहनशक्तिं[7], मदिराया मदं[8], कौस्तुभमणेरतिनैष्ठुर्यम्[9] इत्येतानि सहवासपरिचयाद् विरहविनोदचिह्नानि गृहीत्वैवोद्गता॥

---

1. नाविद्यते सुवर्णस्य विरचनं यस्मिन्नेवभूतम्। 2. अग्राम्यम्=प्रशंसनीयम् 3. गजो हस्ती तस्य यन्निमीलनं=नेत्रसङ्कोचस्तद्वन्निमीलितेन। 4. विहला=व्याकुला 5. एकान्तवक्रताम्=कुटिलतां प्रातिकूल्यं च। 6. चञ्चलतां=चित्तास्थैर्यं चाञ्चल्यं च। 7. मोहनशक्तिं=मूर्छोत्पादकशक्तिं, अन्यवशीकरणशक्तिं च। 8. मदम्=उन्मादत्वम्, उन्मोहसम्भेदलक्षणं च। 9. नैष्ठुर्यं=काठिन्यं, निर्दयत्वं च।

इयमनार्या[1] लब्धापि खलु दुःखेन परिपाल्यते। न परिचयं रक्षति, न कुलक्रममनुवर्त्तते, न शीलं पश्यति, न विशेषज्ञतां विचारयति, पारुष्यमिवोपशिक्षितुमसिधारासु निवसति, स्वल्पसत्त्वमुन्मत्तीकरोति[2]। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति, विनीतं पातकिनमिव प्रसर्पति। मनस्विनमुन्मत्तमिवोपहसति ॥

यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव[3] कर्म केवलमुद्वमति। तथाहि—इयं संवर्धनवारिधारा तृष्णाविषवल्लीनाम्, आवासदरी दोषाशीविषाणाम्[4], प्रस्तावना कपटनाटकस्य[5], राहुजिह्वा धर्मेन्दुमण्डलस्य ॥

न हि[6] तं पश्यामि, यो ह्यपरिचितयानया न निर्भरमुपगूढः[7], यो वा न विप्रलब्धः। नियतमियमालेख्यगतापि चलति। श्रुतापि[8] प्यतिसन्धत्ते। चिन्तितापि वञ्चयति। एवं विधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लबा[9] भवन्ति राजानः। सर्वाविनयाधिष्ठानतां[10] च गच्छन्ति ॥

---

1. अनार्या=अश्रेष्ठा लक्ष्मीः। 2. स्वल्पसत्त्वम्=अल्पसत्त्वम्=अल्पसारम्। 3. कज्जलमलिनम्=कज्जलवन्मलिनं कश्मलं कर्मउद्वमति=उद्गिरति। 4. आशीर्दंष्ट्रा तस्यां विषं येषां ते आशीविषाः= सर्पाः। 5. कपटनाटकस्य=कैतवनृत्तस्य। 6. हि=निश्चितम्। 7. यः पुमानपरिचितया सन्निहितया निर्भरमतिशयेनोपगूढो नाश्लिष्टः। 8. श्रुताप्याकर्णिताप्यतिसन्धत्ते=अतिसन्धानं करोति। 9. विक्लबाः= विह्वलाः। 10. अधिष्ठानताम्=अधिकरणताम्।

तथा हि अभिषेकसमय एवैषां मङ्गलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्। अग्निकार्यधूमेनेव मलिनीभवति हृदयम्। चामरपवनैरिवापह्रियते सत्यवादिता। वेत्रदण्डैरिवोत्सार्यन्ते गुणाः॥

तथाहि केचित् प्रकृतिचञ्चलतया लब्धप्रसरेण[1] केनापि शत-[2]सहस्रतामिवोपगतेन मनसाकुलीक्रियमाणा विह्वलता[3]मुपयान्ति। मृषावादसंजातमुखरोगा[4] इवातिकृच्छ्रेण जल्पन्ति। आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति। उत्कुपितलोचना इव तेजस्विनो नेक्षन्ते। तृष्णाविषमूर्छिताः कनकमयमिव सर्वं पश्यन्ति। अनुदिवसमापूर्यमाणाः पापेनेवाध्मातमूर्तयो[5] भवन्ति। तृणाग्रावस्थिता जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति॥

अपरे तु स्वार्थनिष्पादनपरैः धनपिशितगृध्रैः[6] आस्थाननलि-[7]नीधूर्तबकैः द्यूतं[8] विनोद इति, मृगया श्रमं[9] इति, पानं विलास

---

1. लब्धः प्रसरोऽवकाशो येन। 2. शतसहस्रताम्=लक्षताम्। 3. विह्वलताम्=उत्पिञ्जलताम्। 4. मृषावादोऽसत्यभाषणं तस्य विपाकः परिणामः तेन संजातः। 5. आध्मातमूर्तयः=स्थूलदेहाः। 6. धनं द्रव्यं तदेव पिशितं मांसं तस्मिन् गृध्रैः दूरदृष्टिभिः द्रव्यार्जनपरैरित्यर्थः 7. आस्थानं नृपोपवेशनस्थलं तदेव नलिनी कमलिनी तस्यां 8. द्यूतं दुरोदरम्। 9. श्रमः=अभ्यासः।

इति, गुरुवचनावधीरणम्[1] अपरप्रणेयत्वम्[2] इति, परिभवसहनं[3] क्षमेति, दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्त्तैरमानुषोचिताभिः[4] स्तुतिभिः प्रतार्यमाणाः वित्तमदमत्तचित्ताः सर्वजनस्योपहास्यतामुपयान्ति ॥

दर्शनप्रदानमप्यनुग्रहं गणयन्ति। आज्ञामपि वरप्रदानं मन्यन्ते। स्पर्शमपि पावनमाकलयन्ति। न मानयन्ति मान्यान्। नाभ्युत्तिष्ठन्ति[5] गुरून्। कुप्यन्ति हितवादिने। सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, योऽहर्निशम् अनवरतम् उपरचिताञ्जलिः[6] अधिदैवतम्[7] इव विगतान्यकर्तव्यः स्तौति ॥

किं वा तेषां[8] साम्प्रतं[9], येषामतिनृशंसप्रायोपदेशनिर्घृणं[10] कौटिल्यशास्त्रं प्रमाणम्। आभिचारक्रियाक्रूरैकप्रकृतयः[11] पुरोधसो[12] गुरवः। परातिसन्धानपरा मन्त्रिण उपदेष्टारः ॥

---

1. गुरुः हिताहितप्राप्तिपरिहारोपदेष्टा। 2. वश्यः प्रणेय इति कोशः। 3. परिभवः=तिरस्कारः। 4. धूर्तैं=विप्रतारकैः शठैर्वा। 5. नाभ्युत्तिष्ठन्ति=अभ्युत्थानं न कुर्वन्ति। 6, अञ्जलिः=संयोजितकरपुटः। 7. अधिदैवतम्=इष्टदैवतम्। 8. तेषां=विभूतिमताम्। 9. साम्प्रतं=युक्तम् 10. अतिनृंशसप्रायो प्रायेणातिक्रूरः य उपदेशः शिक्षा तेन निर्गता घृणा दया यस्मादेतादृशम् कौटिल्यशास्त्रं यामलादि प्रमाणमिती 11. आभिचारक्रिया=कृत्याप्रतिकृत्यादिरूपक्रिया। 12. पुरोधसः=पुरोहिताः

तदेवंप्रायेऽतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन्, महामोहकारिणि च यौवने, कुमार! तथा प्रयतेथाः, यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, न प्रतार्यसे [1]कुशलैः, न प्रलोभ्यसे वनिताभिः, नापह्रियसे सुखेन ॥

कामं भवान् प्रकृत्यैव धीरः। पित्रा च महता प्रयत्नेन समारोपितसंस्कारः। तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्। इदमेव च पुनः पुनरभिधीयसे [2]विद्वांसमपि, [3]सचेतनमपि, [4]महासत्त्व[5]मप्यभिजातमपि, धीरमपि, प्रयत्नवन्तमपि, पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति। सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान् यौवराज्याभिषेकमङ्गलम्। उद्वह राज्यधुराम्। अभिषेकानन्तरं च सप्तद्वीपभूषणां विजयस्व वसुन्धराम्। इत्येतावदभिधायोपशशाम ॥

---

1. कुशलैः=वशीकरणचतुरैः। 2. विद्वांसमपि=पण्डितमपि। 3. सचेतनमपि=ज्ञानवन्तमपि। 4. महासत्त्वमपि=महासाहसमपि। 5. अभिजातमपि=कुलीनमपि।

## परिशीलनम् ।

१. गुरूपदेशस्य माहात्म्यं विशदयत ।

२. लक्ष्मीः क्षीरसागरात् कानि गृहीत्वोद्गता ?

३. लक्ष्म्याः अनार्यत्वं प्रपञ्चयत ।

४. लक्ष्मीमदशालिनां प्रकृतिदोषान् विवृणुत ।

५. "इदमेव पुनः पुनरभिधीयसे" अभिधानप्रकारः कीदृशः ?

६. बालः प्रातः उदतिष्ठत् । स्नानभोजनादीनि अकरोत् । ततः पाठशालाम् अगच्छत् । सायं गृहं प्रति न्यवर्तत च---एकवाक्यं कुरुत ।

७. अधोऽङ्कितेषु पदेषु उचिताः विभक्तीः निर्दिश---
(१) शिष्याः गुरु अभ्युत्तिष्ठन्ति ; (२) लक्ष्मी-मदशालिनः हितवादिन् कुप्यन्ति । (३) प्रभुः बाल फलानि यच्छति ।

८. समपदानि लिखत—
(१) विद्वांसः + जनाः, (२) महान्तं + मोहं करोति इति, (३) राज्यस्य + धूः ।

## नवमः पाठः

# अमृतमथनम् ।

[दशरथसकाशाद् यागरक्षायै रामलक्ष्मणावादाय सिद्धाश्रमं प्रति प्रस्थितो विश्वामित्रो यात्रासमये मार्गखेदपरिहाराय बहुविधाः कथाः कथयितुमारभत। गङ्गावतरणकथायाः कथनानन्तरं प्रस्तुतेयम् अमृतमथनकथा ॥]

विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ।
विस्मयं परमं गत्वा विश्वामित्रमथाब्रवीत् ॥ [१]

अत्यद्भुतमिदं ब्रह्मन् कथितं परमं त्वया ।
गङ्गावतरणं पुण्यं सागरस्यापि पूरणम् ॥ [२]

क्षणभूतेव मे रात्रिः संवृत्तेयं परन्तप ।
इमां चिन्तयतः सर्वां निखिलेन कथां तव ॥ [३]

तस्य सा शर्वरी सर्वा मम सौमित्रिणा सह ।
जगाम चिन्तयानस्य विश्वामित्रकथां शुभाम् ॥ [४]

ततःप्रभाते विमले विश्वामित्रं तपोधनम् ।
उवाच राघवो वाक्यं कृताह्निकमरिन्दमः ॥ [५]

गता भगवती रात्रिः श्रोतव्यं परमाद्भुतम् ।
तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीम् ॥ [६]

नौरेषा हि सुखास्तीर्णा ऋषीणां पुण्यकर्मणाम् ।
भगवन्तमिह प्राप्तं ज्ञात्वा त्वरितमागता ॥ [७]

तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ।
सन्तारं कारयामास सर्षिसङ्घस्य कौशिकः ॥ [८]

उत्तरं तीरमासाद्य सम्पूज्यर्षिगणं ततः ।
गङ्गाकूले निविष्टास्ते विशालां ददृशुः पुरीम् ॥ [९]

ततो मुनिवरस्तूर्णं जगाम सहराघवः ।
विशालां नगरीं रम्यां दिव्यां स्वर्गोपमां तदा ॥ [१०]

अथ रामो महाप्राज्ञो विश्वामित्रं महामुनिम् ।
पप्रच्छ प्राञ्जलिर्भूत्वा विशालामुत्तमां पुरीम् ॥ [११]

कतमो राजवंशोऽयं विशालायां महामुने ।
श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे ॥ [१२]

तस्य तद्वचनं श्रुत्वा रामस्य मुनिपुङ्गवः ।
आख्यातुं तत् समारेभे विशालायाः पुरातनम् ॥ [१३]

श्रूयतां राम शक्रस्य कथां कथयतः श्रुताम् ।
अस्मिन् देशे हि यद्वृत्तं शृणु तत्त्वेन राघव ॥ [१४]

पूर्वं कृतयुगे राम दितेः पुत्राः महाबलाः ।
अदितेश्च महाभागा वीर्यवन्तः सुधार्मिकाः ॥ [१५]

ततस्तेषां नरव्याघ्र बुद्धिरासीन्महात्मनाम् ।
अमरा विजराश्चैव कथं स्यामो निरामयाः ॥ [१६]

तेषां चिन्तयतां तत्र बुद्धिरासीद्विपश्चिताम् ।
क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै ॥ [१७]

ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम् ।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥ [१८]

अथ वर्षसहस्रेण योक्त्रसर्पशिरांसि च ।
चमन्तोऽतिविषं तत्र ददशुर्दशनैः शिलाः ॥ [१९]

उत्पपाताग्निसङ्काशं हालाहलमहाविषम् ।
तेन दग्धं जगत्सर्वं सदेवासुरमानुषम् ॥ [२०]

अथ देवा महादेवं शङ्करं शरणार्थिनः ।
जग्मुः पशुपतिं रुद्रं त्राहि त्राहीति तुष्टुवुः ॥ [२१]

एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः ।
प्रादुरासीत्ततोऽत्रैव शङ्खचक्रधरो हरिः ॥ [२२]

उवाचैनं स्मितं कृत्वा रुद्रं शूलधरं हरिः ।
दैवतैर्मथ्यमाने तु यत् पूर्वं समुपस्थितम् ॥ [२३]

तत्त्वदीयं सुरश्रेष्ठ सुराणामग्रतो हि यत् ।
अग्रपूजामिह स्थित्वा गृहाणेदं विषं प्रभो ॥ [२४]

इत्युक्त्वा च सुरश्रेष्ठस्तत्रैवान्तरधीयत ।
देवतानां भयं दृष्ट्वा श्रुत्वा वाक्यं तु शार्ङ्गिणः ॥ [२५]

हालाहलं विषं घोरं संजग्राहामृतोपमम् ।
देवान् विसृज्य देवेशो जगाम भगवान् हरः ॥ [२६]

ततो देवासुराः सर्वे ममन्थू रघुनन्दन ।
प्रविवेशाथ पातालं मन्थानः पर्वतोत्तमः ॥ [२७]

ततो देवास्सगन्धर्वास्तुष्टुवुर्मधुसूदनम् ।
त्वं गतिः सर्वभूतानां विशेषेण दिवौकसाम् ॥ [२८]

पाल्यास्मान् महाबाहो गिरिमुद्धर्तुमर्हसि ।
इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः ॥ [२९]

पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः ।
पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः ॥ [३०]

देवानां मध्यतः स्थित्वा ममन्थ पुरुषोत्तमः ।
अथ वर्षसहस्रेण आयुर्वेदमयः पुमान् ॥ [३१]

उदतिष्ठत् सुधर्मात्मा सदण्डः सकमण्डलुः ।
अथ धन्वन्तरिर्नाम अप्सराश्च सुवर्चसः ॥ [३२]

अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः ।
उत्पेतुर्मनुजश्रेष्ठस्तस्मादप्सरसोऽभवन् ॥ [३३]

षष्टिः कोट्योऽभवंस्तासामप्सराणां सुवर्चसाम् ।
असंख्येयास्तु काकुत्स्थ यास्तासां परिचारिकाः ॥ [३४]

न ताः स्म प्रतिगृह्णन्ति सर्वे ते देवदानवाः ।
अप्रतिग्रहणादेव ता वै साधारणाः स्मृताः ॥ [३५]

वरुणस्य ततः कन्या वारुणी रघुनन्दन ।
उत्पपात महाभागा मार्गमाणा परिग्रहम् ॥ [३६]

दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजाम् ।
अदितेस्तु सुता वीर जगृहुस्तामनिन्दिताम् ॥ [३७]

असुरास्तेन दैतेयाः सुरास्तेनादितेः सुताः ।
हृष्टाः प्रमुदिताश्चासन् वारुणीग्रहणात् सुराः ॥ [३८]

उच्चैःश्रवा हयश्रेष्ठो मणिरत्नं च कौस्तुभम् ।
उदतिष्ठन्नरश्रेष्ठ तथैवामृतमुत्तमम् ॥ [३९]

अथ तस्य कृते राम महानासीत् कुलक्षयः ।
अदितेस्तु ततः पुत्रा दितिपुत्रानयोधयन् ॥ [४०]

एकतामगमन् सर्वे असुरा राक्षसैः सह ।
युद्धमासीन्महाघोरं वीर त्रैलोक्यमोहनम् ॥ [४१]

यदा क्षयं गतं सर्वं तदा विष्णुर्महाबलः ।
अमृतं सोऽहरत्तूर्णं मायामास्थाय मोहिनीम् ॥ [४२]

ये गताभिमुखं विष्णुमक्षरं पुरुषोत्तमम् ।
संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना ॥ [४३]

अदितेरात्मजा वीरा दितेः पुत्रान्निजघ्निरे ।
अस्मिन् घोरे महायुद्धे दैतेयादित्ययोर्भृशम् ॥ [४४]

निहत्य दितिपुत्रांस्तु राज्यं प्राप्य पुरन्दरः ।
शशास मुदितो लोकान् सर्षिसङ्घान् सचारणान् ॥ [४५]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
षट्चत्वारिंशः सर्गः ॥

## परिशीलनम् ।

१. " उवाच राघवो वाक्यम् " किमुवाच ?

२. मथनसमये समुद्भूतं 'हालाहलं' कः प्रतिजग्राह ? तथा प्रतिग्रहणे हेतुश्च कः ?

३. मथनस्य कीदृशो विघ्नः समजनि, तं विघ्नं कः कथमपाकरोत् ?

४. अप्सरसामन्वर्थनामतां, तासां साधारणत्वं कथं जातम् इति च वदत ।

५. मथनसमये कानि कानि वस्तूनि उदतिष्ठन् ?

६. अमृतलाभात् परं किं समभूदिति विवृणुत ।

## दशमः पाठः

# अनसूया सीतासंवादः।

[भरतादीन् प्रतिनिंवर्त्य चित्रकूटात् प्रस्थितः सीतालक्ष्मणसहितो रामः अत्रिमहर्षेराश्रमं प्राप। तं महार्षि ववन्दे च। अत्रेरादेशेन तत्पत्नीं तपस्विनीं अनसूयामुपगम्य सीता प्रणनाम। अनसूया च "भर्तृनाथा हि नार्यः, तत्त्वं पतिप्रधाना स्वभर्तुः सहधर्मचारिणी भव। तस्माद्यशो धर्मं च समाप्स्यसि" इत्याशीर्वादपुरस्सरमुपदिदेश। ततस्तयोर्मिथः प्रवृत्तं सम्भाषणमेवास्मिन् सर्गे प्रतिपाद्यते।

१. सा त्वेवमुक्ता वैदेही त्वनसूयानसूयया।
प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे॥

२. पाणिप्रदानकाले च यत् पुरात्वग्निसन्निधौ।
अनुशिष्टं जनन्या मे वाक्यं तदपि मे धृतम्॥ [८]

३. न विस्मृतं तु मे सर्वं वाक्यैः स्वैर्धर्मचारिणि।
पतिशुश्रूषणान्नार्यास्तपो नान्यद्विधीयते॥ [९]

४. सावित्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते।
तथावृत्तिश्च याता त्वं पतिशुश्रूषया दिवम्॥ [१०]

५. वरिष्ठा सर्वनारीणामेषा च दिवि देवता।
रोहिणी न बिना चन्द्रं मुहूर्तमपि दृश्यते॥ [११]

६. एवंविधाश्च प्रवराः स्त्रियो भर्तृदृढव्रताः।
देवलोके महीयन्ते पुण्येन स्वेन कर्मणा॥ [१२]

७. ततोऽनसूया संहृष्टा श्रुत्वोक्तं सीतया वचः ।
शिरस्याघ्राय चोवाच मैथिलीं हर्षयन्त्युत ॥ [१३]

८. नियमैर्विविधैराप्तं तपो हि महदस्ति मे ।
तत्संश्रित्य बलं सीते छन्दये त्वां शुचिव्रते ॥ [१४]

९. उपपन्नं च युक्तं च वचनं तव मैथिलि ।
प्रीता चास्म्युच्यतां सीते करवाणि प्रियं च किम् ॥
[१५]

१०. तस्यास्तद्वचनं श्रुत्वा विस्मितामन्दविस्मया ।
कृतमित्यब्रवीत् सीता तपोबलसमन्विताम् ॥ [१६]

११. सा त्वेवमुक्ता धर्मज्ञा तथा प्रीततराऽभवत् ।
सफलं च प्रहर्षं ते हन्त सीते करोम्यहम् ॥ [१७]

१२. इदं दिव्यं वरं माल्यं वस्त्रमाभरणानि च ।
अङ्गरागं च वैदेहि महार्हमनुलेपनम् ॥ [१८]

१३. मया दत्तमिदं सीते तव गात्राणि शोभयेत् ।
अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति ॥ [१९]

१४. अङ्गरागेण दिव्येन लिप्ताङ्गी जनकात्मजे ।
शोभयिष्यसि भर्तारं यथा श्रीर्विष्णुमव्ययम् ॥ [२०]

१५. सा वस्त्रमङ्गरागं च भूषणानि स्रजस्तथा ।
मैथिली प्रतिजग्राह प्रीतिदानमनुत्तमम् ॥ [२१]

१६. प्रतिगृह्य च तत् सीता प्रीतिदानं यशस्विनी ।
श्लिष्टाञ्जलिपुटा धीरा समुपास्त तपोधनाम् ॥ [२२]

१७. तथा सीतामुपासीनामनसूया दृढव्रता ।
वचनं प्रष्टुमारेभे कथां कांचिदनुप्रियाम् ॥ [२३]

१८. स्वयंवरे किल प्राप्ता त्वमनेन यशस्विना ।
राघवेणेति मे सीते कथा श्रुतिमुपागता ॥ [२४]

१९. तां कथां श्रोतुमिच्छामि विस्तरेण च मैथिलि ।
यथाभूतं च कार्त्स्न्येन तन्मे त्वं वक्तुमर्हसि ॥ [२५]

२०. एवमुक्ता तु सा सीता तापसीं धर्मचारिणीम् ।
श्रूयतामिति चोक्त्वा वै कथयामास तां कथाम् ॥ [२६]

२१. मिथिलाधिपतिर्वीरो जनको नाम धर्मवित् ।
क्षत्रकर्मण्यभिरतो न्यायतः शास्ति मेदिनीम् ॥ [२७]

२२. तस्य लाङ्गलहस्तस्य कृषतः क्षेत्रमण्डलम् ।
अहं किलोत्थिता भित्वा जगतीं नृपतेः सुता ॥ [२८]

२३. स मां दृष्ट्वा नरपतिर्मुष्टिविक्षेपतत्परः ।
पांसुगुण्ठितसर्वाङ्गीं विस्मितो जनकोऽभवत् ॥ [२९]

२४. अनपत्येन च स्नेहादङ्कमारोप्य च स्वयम् ।
ममेयं तनयेत्युक्त्वा स्नेहो मयि निपातितः ॥ [३०]

२५. अन्तरीक्षे च वागुक्ताप्रतिमामानुषी किल ।
एवमेतन्नरपते धर्मेण तनया तव ॥ [३१]

२६. ततः प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः ।
अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः ॥ [३२]

२७. दत्ता चास्मीष्टवद्देव्यै ज्येष्ठायै पुण्यकर्मणे।
तया सम्भाविता चास्मि स्निग्धया मातृसौहृदात्॥[३३]

२८. पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता।
चिन्तामभ्यगमद्दीनो वित्तनाशादिवाधनः॥ [३४]

२९. सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात्।
प्रधर्षणमवाप्नोति शक्रेणापि समो भुवि॥ [३५]

३०. तां धर्षणामदूरस्थां सन्दृश्यात्मनि पार्थिवः।
चिन्तार्णवगतः पारं नाससादाप्लवो यथा॥ [३६]

३१. अयोनिजां हि मां ज्ञात्वा नाध्यगच्छत् स चिन्तयन्।
सदृशं चाभिरूपं च महीपालः पतिं मम॥ [३७]

३२. तस्य बुद्धिरियं जाता चिन्तयानस्य सन्ततम्।
स्वयंवरं तनूजायाः करिष्यामीति धर्मतः॥ [३८]

३३. महायज्ञे तदा तस्य वरुणेन महात्मना।
दत्तं धनुर्वरं प्रीत्या तूणी चाक्षय्यसायकौ॥ [३९]

३४. असञ्चाल्यं मनुष्यैश्च यत्नेनापि च गौरवात्।
तन्न शक्ता नमयितुं स्वप्नेष्वपि नराधिपाः॥ [४०]

३५. तद्धनुः प्राप्य मे पित्रा व्याहृतं सत्यवादिना।
समवाये नरेन्द्राणां पूर्वमामन्त्र्य पार्थिवान्॥ [४१]

३६. इदं च धनुरुद्यम्य सज्यं यः कुरुते नरः।
तस्य मे दुहिता भार्या भविष्यति न संशयः॥[४२]

३७. तच्च दृष्ट्वा धनुः श्रेष्ठं गौरवाद्गिरिसन्निभम् ।
अभिवाद्य नृपा जग्मुरशक्तास्तस्य तोलने ॥ [४३]

३८. सुदीर्घस्य तु कालस्य राघवोऽयं महाद्युतिः ।
विश्वामित्रेण सहितो यज्ञं द्रष्टुं समागतः ॥ [४४]

३९. लक्ष्मणेन सह भ्राता रामः सत्यपराक्रमः ।
विश्वामित्रस्तु धर्मात्मा मम पित्रा सुपूजितः ॥ [४५]

४०. प्रोवाच पितरं तत्र राघवौ रामलक्ष्मणौ ।
सुतौ दशरथस्येमौ धनुर्दर्शनकाङ्क्षिणौ ॥ [४६]

४१. इत्युक्तस्तेन विप्रेण तद्धनुः समुपानयत् ।
तद्धनुर्दर्शयामास राजपुत्राय दैविकम् ॥ [४७]

४२. निमेषान्तरमात्रेण तदानम्य महाबलः ।
ज्यां समारोप्य झटिति पूरयामास वीर्यवान् ॥ [४८]

४३. तेनापूरयता वेगान्मध्ये भग्नं द्विधा धनुः ।
तस्य शब्दोऽभवद् भीमः पतितस्याशनेर्यथा ॥ [४९]

४४. ततोहं तत्र रामाय पित्रा सत्याभिसन्धिना ।
उद्यता दातुमुद्यम्य जलभाजनमुत्तमम् ॥ [५०]

४५. दीयमानां न तु तदा प्रतिजग्राह राघवः ।
अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः ॥ [५१]

४६. ततः श्वशुरमामन्त्र्य वृद्धं दशरथं नृपम् ।
मम पित्रा त्वहं दत्ता रामाय विदितात्मने ॥ [५२]

४७. मम चैवानुजा साध्वी ऊर्मिला शुभदर्शना।
भार्यार्थे लक्ष्मणस्यापि दत्ता पित्रा मम स्वयम्॥ [५३]

४८. एवं दत्तास्मि रामाय तथा तस्मिन् स्वयंवरे।
अनुरक्तास्मि धर्मेण पतिं वीर्यवतां वरम्॥ [५४]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे अष्टादशाधिकशततमः सर्गः॥

---

## परिशीलनम्।

१. "प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे" सीता-वाक्यमनूद्यताम्।
२. अनसूयायाः सीतायां प्रीतिः कुतो जाता?
३. अनसूयया सीतायै प्रीतिहेतोः कानि कानि वस्तूनि दत्तानि?
४. सीताया उत्पत्तिः कथमिति वदत।
५. सीतां प्रति जनकस्य कीदृशी चिन्ता आसीत्?
६. सीताप्रदाने जनकेन कीदृशो निश्चयः कृतः?
७. रामः कथं सीतामलभत?
८. सीतायाः विवाहपर्यन्तकथां सङ्गृह्णीत।

---

एकादशः पाठः

# विश्वामित्रस्य वासिष्ठात् पराभवः

[कस्मिंश्चिद्दिने, सन्ध्यायां गङ्गाजले, अङ्गारपर्णो नाम गन्धर्वराजः स्त्रियः क्रीडयन् अतिष्ठत्। तस्मिन्नवसरे पाण्डवास्तीर्थगामिनः सन्तः तं प्रदेशं प्राप्ताः। जलक्रीडाविघ्नात् क्रुद्धोऽङ्गारपर्णस्तानभ्ययुङ्क्त। अर्जुनेन पराजितो गृहीतश्च सः। पुनस्तत्पत्न्या अभ्यर्थनया युधिष्ठिरेणानुकम्पितश्च स गन्धर्वो मित्रतां गतः कथां कथयितुमारभत। तत्र प्रसङ्गात्समागतेयं विश्वामित्रस्य वसिष्ठात् पराभवस्य कथा।]

किंनिमित्तमभूद्वैरं विश्वामित्रवसिष्ठयोः।
वसतोराश्रमे दिव्ये शंस नः सर्वमेव तत्॥ [१]

इदं वासिष्ठमाख्यानं पुराणं परिचक्षते।
पार्थ सर्वेषु लोकेषु यथावत् तन्निबोध मे॥ [२]

कान्यकुब्जे महानासीत् पार्थिवो भरतर्षभ।
गाधीति विश्रुतो लोके कुशिकस्यात्मसंभवः॥ [३]

तस्य धर्मात्मनः पुत्रः समृद्धबलवाहनः।
विश्वामित्र इति ख्यातो बभूव रिपुमर्दनः॥ [४]

स चचार सहामात्यो मृगयां गहने वने।
मृगान् विध्यन् वराहांश्च रम्येषु मरुधन्वसु॥ [५]

व्यायामकर्शितः सोऽथ मृगलिप्सुः पिपासितः।
आजगाम नरश्रेष्ठ वसिष्ठस्याश्रमं प्रति। [६]

तमागतमभिप्रेक्ष्य वसिष्ठः श्रेष्ठभागृषिः।
विश्वामित्रं नरश्रेष्ठं प्रतिजग्राह पूजया॥ [७]

पाद्यार्घ्याचमनीयैस्तं स्वागतेन च भारत।
तथैव परिजग्राह वन्येन हविषा तदा॥ [८]

तस्याथ कामधुग् धेनुर्वसिष्ठस्य महात्मनः।
उक्ता कामान् प्रयच्छेति सा कामान् दुह्यते सदा॥ [९]

ग्राम्यारण्याश्चौषधीश्च दुदुहे पय एव च।
षड्रसं चामृतनिभं रसायनमनुत्तमम्॥ [१०]

भोजनीयानि पेयानि भक्ष्याणि विविधानि च।
लेह्यान्यमृतकल्पानि चोष्याणि च तथार्जुन। [११]

रत्नानि च महार्हाणि वासांसि विविधानि च।
तैः कामैः सर्वसम्पूर्णैः पूजितश्च महीपतिः॥ [१२]

सामात्यः सबलश्चैव तुतोष स भृशं तदा।
षडुन्नतां सुपार्श्वोरुं पृथुपञ्चसमावृताम्॥ [१३]

मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम्।
सुवालधिं शङ्कुकर्णां चारुशृङ्गां मनोरमाम्॥ [१४]

पुष्टायतशिरोग्रीवां विस्मितः सोऽभिवीक्ष्य ताम्।
अभिनन्द्य स तां राजा नन्दिनीं गाधिनन्दनः॥ [१५]

अब्रवीच्च भृशं तुष्टः स राजा तमृषिं तदा।
अर्बुदेन गवां ब्रह्मन् मम राज्येन वा पुनः॥ [१६]
नन्दिनीं सम्प्रयच्छस्व भुङ्क्ष्व राज्यं महामुने।

वसिष्ठ उवाच ।

देवतातिथिपित्रर्थं याज्यार्थं च पयस्विनी ॥ [१७]
अदेया नन्दिनीयं वै राज्येनापि तवानघ ।

विश्वामित्र उवाच ।

क्षत्रियोऽहं भवान् विप्रस्तपस्स्वाध्यायसाधनः ॥ [१८]
ब्राह्मणेषु कुतो वीर्यं प्रशान्तेषु धृतात्मसु ।
अर्बुदेन गवां यस्त्वं न ददासि ममेप्सितम् ॥ [१९]
स्वधर्मं न प्रहास्यामि नेष्यामि च बलेन गाम् ।

वसिष्ठ उवाच ।

बलस्थश्चासि राजा च बाहुवीर्यश्च क्षत्रियः ॥ [२०]
यथेच्छसि तथा क्षिप्रं कुरु मा त्वं विचारय ।

गन्धर्व उवाच ।

एवमुक्तस्तथा पार्थ विश्वामित्रो बलादिव ॥ [२१]
हंसचन्द्रप्रतीकाशां नन्दिनीं तां जहार गाम् ।
कशादण्डप्रणुदितां काल्यमानामितस्ततः[1] ॥ [२२]
हम्मायमाना कल्याणी वसिष्ठस्याथ नन्दिनी ।
आगम्याभिमुखी पार्थ तस्थौ भगवदुन्मुखी ॥ [२३]
भृशं च ताड्यमाना वै न जगामाश्रमात्ततः ।

---

1. काल्यमानाम्=प्रधाप्यमानाम् ।

वसिष्ठ उवाच ।

श्रृणोमि ते रवं भद्रे विनदन्त्याः पुनः पुनः ॥ [२४]

ह्रियसे त्वं बलाद् भद्रे विश्वामित्रेण नन्दिनी ।
किं कर्त्तव्यं मया तत्र क्षमावान् ब्राह्मणो ह्यहम् ॥ [२५]

गन्धर्व उवाच ।

सा भयान्नन्दिनी तेषां बलानां भरतर्षभ ।
विश्वामित्रभयोद्विग्ना वसिष्ठं समुपागमत् ॥ [२६]

गौरुवाच ।

कशाग्रदण्डाभिहतां क्रोशन्तीं मामनाथवत् ।
विश्वामित्रबलैर्घोरैर्भगवन् किमुपेक्षसे ॥ [२७]

गन्धर्व उवाच ।

नन्दिन्यामेवं क्रन्दन्त्यां धर्षितायां महामुनिः ।
न चुक्षुभे तदा धैर्यान्न चचाल धृतव्रतः ॥ [२८]

वसिष्ठ उवाच ।

क्षत्रियाणां बलं तेजो ब्राह्मणानां क्षमा बलम् ।
क्षमा मां भजते यस्माद् गम्यतां यदि रोचते ॥ [२९]

नन्दिन्युवाच ।

किमु त्यक्तास्मि भगवन् यदेवं त्वं प्रभाषसे ।
अत्यक्ताहं त्वया ब्रह्मन् नेतुं शक्या न वै बलात् ॥ [३०]

वसिष्ठ उवाच।

न त्वां त्यजामि कल्याणि स्थीयतां यदि शक्यते।
दृढेन दाम्ना बध्वैष वत्सस्ते ह्रियते बलात्॥ [३१]

स्थीयतामिति तच्छ्रुत्वा वसिष्ठस्य पयस्विनी।
ऊर्ध्वाञ्चितशिरोग्रीवा प्रबभौ रौद्रदर्शना॥ [३२]

क्रोधरक्तेक्षणा सा गौर्हम्मारवघनस्वना।
विश्वामित्रस्य तत्सैन्यं व्यद्रावयत सर्वशः॥ [३३]

कशाग्रदण्डाभिहता काल्यमाना ततस्ततः।
क्रोधरक्तेक्षणा क्रोधं भूय एव समाददे॥ [३४]

आदित्य इव मध्याह्ने क्रोधदीप्तवपुर्बभौ।
अङ्गारवर्षं मुञ्चन्ती मुहुर्वालधितो महत्॥ [३५]

मूलतश्चासृजत् कांश्चिच्छबरांश्चैव पार्श्वतः।
पौण्ड्रान् किरातान् यवनान् सिंहलान् बर्बरान् खसान्॥ [३६]

चिबुकांश्च पुलिन्दांश्च चीनान् हूणान् सकेरलान्।
ससर्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥ [३७]

तैर्विसृष्टैर्महासैन्यैर्नानाम्लेच्छगणैस्तदा।
नानावरणसञ्छन्नैर्नानायुधधरैस्तथा॥ [३८]

अवाकीर्यत संरब्धैर्विश्वामित्रस्य पश्यतः।
एकैकश्च तदा योधः पञ्चभिःसप्तभिर्वृतः॥ [३९]

अस्त्रवर्षेण महता वध्यमानं बलं तदा।
प्रभग्नं सर्वतस्त्रस्तं विश्वामित्रस्य पश्यतः॥ [४०]

न च प्राणैर्वियुज्यन्ते केचित् तत्रास्य सैनिकाः।
विश्वामित्रस्य संक्रुद्धैर्वासिष्ठैर्भरतर्षभ ॥ [४१]

सा गौस्तत् सकलं सैन्यं कालयामास दूरतः।
विश्वामित्रस्य तत् सैन्यं काल्यमानं त्रियोजनम् ॥ [४२]

क्रोशमानं भयोद्विग्नं त्रातारं नाध्यगच्छत।
दृष्ट्वा तन्महदाश्चर्यं ब्रह्मतेजोभवं तदा ॥ [४३]

विश्वामित्रः क्षत्रभावान्निर्विण्णो वाक्यमब्रवीत्।
धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् ॥ [४४]

बलाबलं विनिश्चित्य तप एव परं बलम्।
स राज्यं स्फीतमुत्सृज्य तां च दीप्तां नृपश्रियम् ॥ [४५]

भोगांश्च पृष्ठतः कृत्वा तपस्येव मनो दधे।
स गत्वा तपसा सिद्धिं लोकान् विष्टभ्य तेजसा ॥ [४६]

ततापं सर्वान् दीप्तौजा ब्राह्मणत्वमवाप्तवान्।
अपिबच्च ततः सोममिन्द्रेण सह कौशिकः ॥ [४७]

इति श्रीमहाभारते आदिपर्वणि चैत्ररथपर्वणि
वासिष्ठे विश्वामित्रपराभवे
चतुःसप्तत्यधिकशततमोऽध्यायः ॥

## परिशीलनम् ।

१. विश्वामित्रः कथं वसिष्ठाश्रमं प्राप ?

२. अतिथये विश्वामित्राय वसिष्ठः कथमातिथ्यमकरोत् ?

३. विश्वामित्रवसिष्ठयोः नन्दिनीवसिष्ठयोः वा सम्भाषणमनुवदत ।

४. विश्वामित्रेण बलान्नीयमाना नन्दिनी कथं रक्षां प्रापत् ?

५. "धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् ।" सयुक्तिकं समर्थयत ।

६. वसिष्ठाल्लब्धपराभवो विश्वामित्रः किमकरोत् ?

---

## द्वादशः पाठः

# भगवतो भक्तबन्धुता

[कतिपयानि दिनानि अनुस्यूतया वरिवस्यया प्रसन्नमनुजिघृक्षु दुर्वाससं, सुयोधनः, पाण्डवान् दुर्वाससः कोपाग्नौ शलभतां नयेयमिति मत्वा प्रार्थयामास। "यदि भगवान् मयि प्रसन्नस्तर्हि वनमधिवसन्तं सभ्रातृकं सपत्नीकं चास्मज्ज्येष्ठभ्रातरं युधिष्ठिरमुपगम्य सोऽप्यनुगृहीतव्यः । परन्तु कृष्णाया भोजनानन्तरमेव तत्र गन्तव्यम्" इति । सोपि तथेत्युक्त्वा पाण्डवान्तिकं ययौ । किन्तु भगवत्प्रसादेन पाण्डवास्तादृशीं विपदमुदतरन्निति जनमेजयं वैशम्पायनो ब्रूते ।]

**वैशम्पायन उवाच ।**

ततः कदाचिद् दुर्वासाः सुखासीनांस्तु पाण्डवान् ।
भुक्त्वा चावस्थितां कृष्णां ज्ञात्वा तस्मिन् वने मुनिः ॥[१]

अभ्यागच्छत् परिवृतः शिष्यैरयुतसम्मितैः ।
दृष्ट्वायान्तं तमतिथिं स च राजा युधिष्ठिरः ॥ [२]

जगामाभिमुखः श्रीमान् सह भ्रातृभिरच्युतः ।
तस्मै बध्वाञ्जलिं सम्यगुपवेश्य वरासने ॥ [३]

विधिवत् पूजयित्वा तमातिथ्येन न्यमन्त्रयत् ।
आह्निकं भगवन् कृत्वा शीघ्रमेहीति चाब्रवीत् ॥ [४]

जगाम च मुनिः सोऽपि स्नातुं शिष्यैः सहानघः ।
भोजयेत् सह शिष्यं मां कथमित्यविचिन्तयन् ॥ [५]

न्यमज्जत् सलिले चापि मुनिसङ्घः समाहितः।
एतस्मिन्नन्तरे राजन् द्रौपदी योषितां वरा॥ [६]
चिन्तामवाप परमामन्नहेतोः पतिव्रता।
सा चिन्तयन्ती च यदा नान्नहेतुमविन्दत॥ [७]
मनसा चिन्तयामास कृष्णं कंसनिषूदनम्।
कृष्ण कृष्ण महाबाहो देवकीनन्दनाव्यय॥ [८]
वासुदेव जगन्नाथ प्रणतार्त्तिविनाशन।
विश्वात्मन् विश्वजनक विश्वहर्तः प्रभोऽव्यय॥ [९]
प्रपन्नपाल गोपाल प्रजापाल परात् पर।
पाहि मां कृपया देव शरणागतवत्सल॥ [१०]
नीलोत्पलदलश्याम पद्मगर्भारुणेक्षण।
पीताम्बरपरीधान लसत्कौस्तुभभूषण॥ [११]
दुःशासनादहं पूर्वं सभायां मोचिता यथा।
तथैव सङ्कटादस्मान्मामुद्धर्तुमिहार्हसि॥ [१२]

**वैशम्पायन उवाच।**

एवं स्तुतस्तदा देवः कृष्णया भक्तवत्सलः।
द्रौपद्याः सङ्कटं ज्ञात्वा देवदेवो जगत्पतिः॥ [१३]
पार्श्वस्थां शयने त्यक्त्वा रुक्मिणीं केशवः प्रभुः।
तत्राजगाम त्वरितो ह्यचिन्त्यगतिरीश्वरः॥ [१४]

ततस्तं द्रौपदी दृष्ट्वा प्रणम्य परया मुदा।
अब्रवीद् वासुदेवाय मुनेरागमनादिकम् ॥ [१५]

ततस्तामब्रवीत् कृष्णः क्षुधितोऽस्मि भृशातुरः।
शीघ्रं भोजय मां कृष्णे पश्चात् सर्वं करिष्यसि ॥ [१६]

निशम्य तद्वचः कृष्णा लज्जिता वाक्यमब्रवीत्।
स्थाल्यां भास्करदत्तायामन्नं मद्भोजनावधि ॥ [१७]

भुक्तवत्यस्म्यहं देव तस्मादन्नं न विद्यते।
ततः प्रोवाच भगवान् कृष्णां कमललोचनः ॥ [१८]

कृष्णे न नर्मकालोऽयं क्षुच्छ्रमेणातुरे मयि।
शीघ्रं गच्छ मम स्थालीमानीय त्वं प्रदर्शय ॥ [१९]

इति निर्बन्धतः स्थालीमानाय्य स यदूद्वहः।
स्थाल्याः कण्ठेऽथ संलग्नं शाकान्नं वीक्ष्य केशवः ॥ [२०]

उपयुज्याब्रवीदेनामनेन हरिरीश्वरः।
विश्वात्मा प्रीयतां देवस्तुष्टश्चास्त्विति यज्ञभुक् ॥ [२१]

आकारय मुनीन् शीघ्रं भोजनायेति चाब्रवीत्।
सहदेवं महाबाहुः कृष्णः क्लेशविनाशनः ॥ [२२]

ततो जगाम त्वरितः सहदेवो महायशाः।
आकारितुं तु तान् सर्वान् भोजनार्थं नृपोत्तम ॥ [२३]

स्नातुं गतान् देवनद्यां दुर्वासःप्रभृतीन् मुनीन्।
ते चावतीर्णाः सलिले कृतवन्तोऽघमर्षणम् ॥ [२४]

दृष्ट्वोद्गारान् सान्नरसांस्तृप्त्या परमया युताः।
उत्तीर्य सलिलात् तस्माद् दृष्टवन्तः परस्परम् ॥ [२५]

दुर्वाससमभिप्रेक्ष्य ते सर्वे मुनयोऽब्रुवन्।
राज्ञा हि कारयित्वान्नं वयं स्नातुं समागताः ॥ [२६]

आकण्ठतृप्ता विप्रर्षे किंस्विद् भुञ्जामहे वयम्।
वृथा पाकः कृतोऽस्माभिस्तत्र किं करवामहे ॥ [२७]

**दुर्वासा उवाच।**

वृथापाकेन राजर्षेरपराधः कृतो महान्।
मास्मानधाक्षुर्दृष्ट्वैव पाण्डवाः क्रूरचक्षुषा ॥ [२८]

स्मृत्वानुभावं राजर्षेरम्बरीषस्य धीमतः।
बिभेमि सुतरां विप्रा हरिपादाश्रयाज्जनात् ॥ [२९]

पाण्डवाश्च महात्मानः सर्वे धर्मपरायणाः।
शूराश्च कृतविद्याश्च व्रतिनस्तपसि स्थिताः ॥ [३०]

सदाचाररता नित्यं वासुदेवपरायणाः।
क्रुद्धास्ते निर्दहेयुर्वै तूलराशिमिवानलः ॥
तत एतानपृष्ट्वैव शिष्याः शीघ्रं पलायत ॥ [३१]

**वैशम्पायन उवाच।**

इत्युक्तास्ते द्विजाः सर्वे मुनिना गुरुणा तदा।
पाण्डवेभ्यो भृशं भीता दुद्रुवुस्ते दिशो दश ॥ [३२]

सहदेवो देवनद्यामपश्यन् मुनिसत्तमान्।
तीर्थेष्वितस्ततस्तस्या विचचार गवेषयन्॥ [३३]

तत्रस्थेभ्यस्तापसेभ्यः श्रुत्वा तांश्चैव विद्रुतान्।
युधिष्ठिरमथाभ्येत्य तं वृत्तान्तं न्यवेदयत्॥ [३४]

ततस्ते पाण्डवाः सर्वे प्रत्यागमनकाङ्क्षिणः।
प्रतीक्षन्तः कियत्कालं जितात्मानोऽवतस्थिरे॥ [३५]

निशीथेऽभ्येत्य चाकस्मादस्मान् स छलयिष्यति।
कथं च निस्तरेमास्मात् कृच्छ्राद्दैवोपसादितात्॥ [३६]

इति चिन्तापरान् दृष्ट्वा निश्वसन्तो मुहुर्मुहुः।
उवाच वचनं श्रीमान् कृष्णः प्रत्यक्षतां गतः॥ [३७]

**श्रीकृष्ण उवाच।**

भवतामापदं ज्ञात्वा ऋषेः परमकोपनात्।
द्रौपद्या चिन्तितः पार्था अहं सत्वरमागतः॥ [३८]

न भयं विद्यते तस्माद्दृषेर्दुवाससोऽल्पकम्।
तेजसा भवतां भीतः पूर्वमेव पलायितः॥ [३९]

धर्मनित्यास्तु ये केचिन्नते सीदन्ति कर्हिचित्।
आपृच्छे वो गमिष्यामि नियतं भद्रमस्तु वः॥ [४०]

**वैशम्पायन उवाच।**

श्रुत्वेरितं केशवस्य बभूवुः स्वस्थमानसाः।
द्रौपद्या सहिताः पार्थास्तमूचुर्विगतज्वराः॥ [४१]

10036



त्वया नाथेन गोविन्द दुस्तरामापदं विभो ।
तीर्णाः प्लवमिवासाद्य मज्जमाना महार्णवे ॥ [४२]

स्वस्ति साधय भद्रं ते इत्याज्ञातो ययौ पुरीम् ।
पाण्डवाश्च महाभाग द्रौपद्या सहिताः प्रभो ॥ [४३]

ऊषुः प्रहृष्टमनसो विहरन्तो वनाद्वनम् ।
इति तेऽभिहितं राजन् यत् पृष्टोऽहमिह त्वया ॥ [४४]

एवंविधान्यलीकानि धार्तराष्ट्रैर्दुरात्मभिः ।
पाण्डवेषु वनस्थेषु प्रयुक्तानि वृथाऽभवन् ॥ [४५]

इति श्रीमहाभारते वनपर्वणि द्रौपदीहरणपर्वणि
दुर्वासउपाख्याने
त्रिषष्ट्यधिकद्विशततमोऽध्यायः ॥

---

## परिशीलनम् ।

१. दुर्वासाः कदा वने पाण्डवसमीपं प्रापत् ?
२. प्राप्तमतिथिं पाण्डवाः कथं पूजयामासुः ?
३. "मनसा चिन्तयामास कृष्णं कंसनिषूदनम् ।"
द्रौपद्याः कृष्णचिन्ताहेतुं चिन्ताप्रकारं च वदत ।
४. द्रौपद्या चिन्तितः कृष्णः कथं पाण्डवानरक्षत् ?
५. सशिष्यः स्नातुं गतो दुर्वासाः कुतो न प्रत्यागच्छत् ?
६. पाण्डवेषु भगवत्प्रसादोऽस्तीति समर्थयत ।

---

D. P. I. LIBRARY
BANGALORE-29.

## त्रयोदशः पाठः

# श्रीनारायणभट्टः

अस्ति पुरा केरलेषूत्तरेण निलानदीं गव्यूतिमात्रविप्रकृष्टं श्रीनावाक्षेत्रस्य समीपे स्थितमुपरिनवग्रामाभिधानं (मेप्पुत्तूर) विप्रभवनम्। तत्र च वेदवेदाङ्गादिषु महापण्डितः श्रोत्रियो मातृदत्तनामा कश्चिद् द्विजवर आसीत्। तस्य प्रेमनिधानभूतायां पाणिगृहीत्यां सञ्जातः श्रीनारायणभट्टः॥

अयं विद्याभ्यासे प्रेरयतः पितुर्वचनमगणयन् अलसमतिरुद्रम्भरिश्च बाल्यदशामनैषीत्। पश्चात् स्वबन्धुभूतस्य "तृक्कण्टियूर" अच्युतपिषारकस्य पण्डितवर्यस्य सदुपदेशेन प्रबुद्धबुद्धिरध्येतुमुपाक्रमत। तमेवैकं गुरुमाश्रित्य तस्मादेव सर्वा विद्या अध्यैष्ट। नेतरं गुरुमुररीचकार। वेदानपि पिषारकाद् एव अग्रहीद् इति इतिहासविदः कथयन्ति॥

वस्तुतस्तु "मीमांसादि स्वतातात्" इत्यादितदीयपद्यान्मीमांसादीनामध्यापने स्वतातः, निगमपाठे माधवाचार्यः, तर्कबोधने दामोदराख्यः, व्याकरणाधीतौ अच्युतपिषारकः इत्येवं चत्वारो गुरवः श्रीमन्नारायणभट्टस्यासन्नित्यवगम्यते॥

एवमभ्यस्तविद्यस्य तस्य यथा यथा सर्वासु विद्यासु विज्ञानमुपाचीयत, तथा तथा भगवति वासुदेवे भक्तिरप्यवीवृधत्। सम्पूर्ण-

विद्यश्च स कुसुमेषु भृङ्ग इव काव्यशास्त्रनाटकपुराणादिषु विहरन् तदीयरसमास्वदमानः स्वयं काव्यानि रचयन् च कदाचित् स्यानन्दूरपुरं जिगमिषुः स्वावासात् प्रातिष्ठत ॥

मध्येमार्गमम्बरधुनींपुरीं प्राप्य तत्रैकं दिवसं विश्रमसुखमन्वभूत्। तस्मिन्नवसरे तत्रत्यमहाराजस्य देवनारायणस्य भारतपारायणश्रवणे विघ्नः समजनि। तन्निवारणार्थं ब्राह्मणमन्विष्य देवालयं गतवता राजपुरुषेण श्रीनारायणभट्टो राजान्तिकं नीतः ॥

राज्ञा च संयोज्याक्षराणि वाचयितुं शक्यते चेदनुवाचयतु भवानित्याज्ञप्तो नारायणभट्टो भारतं वाचयितुमारब्धवान्। पाठान्तरे पद्यमेकं निर्मायैवमपाठीत्—

" तदा भीमबलाक्रान्ता दुर्योधनवरूथिनी।
शिखा खार्वाटकस्येव कर्णमूलमुपाश्रिता ॥ " इति।

एतच्छ्रुतवान् राजा अद्भुतस्तिमितो भूत्वा कुत इदं पद्यमित्यपृच्छत्। संयोज्य वाचयितुमाज्ञप्तेन मया यथामत्यन्वसारि भवदाज्ञा इति प्रत्युक्तो राजा अतीव सन्तुष्टस्तम् आस्थानपण्डितं कृत्वा बहुधा बहुमंस्तेति श्रूयते ॥

तदनन्तरं श्रीनारायणभट्टपादेन विविधविषया बहवो ग्रन्था निरमायिषत। तेषु 'प्राक्रियासर्वस्वम्', 'मानमेयोदयः',

'नारायणीयम्', 'श्रीपादसप्तति:' इत्यादय: त्रिंशद्ग्रन्था: इदानीं लब्धप्रचारा विद्यन्ते। तत्रापि भागवतार्थान् सङ्गृह्य भक्तिरसप्रधानतया निर्मितं सकलकाव्यगुणोपेतं गुरुपवनेशस्तोत्ररूपं निखिलजनैरत्यादृतं 'नारायणीयम्' विशिष्य देदीप्यते॥

महावातरोगबाधितेन गुरुणा अच्युतपिषारकेण कृते कर्मविपाकप्रायश्चित्ते असौ गुरुभक्त्युद्रेकात् रोगप्रतिमां प्रतिगृह्य गुरुमुल्लाधीकृत्य स्वयं वातरोगीं समपद्यत। तन्निवारणाय गुरुपवनपुरेशं सुदृढया भक्त्या भजमानोऽयं भक्तकवि: प्रत्यहमेकैकं पद्यानां दशकं निर्माय अस्तौषीत्। क्रमिकाणां तेषां दशकानां समाहार एव सहस्रोत्तरश्लोकात्मकं भक्तिरसप्रधानं नारायणीयं स्तोत्ररत्नम्। तेन स नीरोग: समजायत। भगवान् कृष्णस्तदक्षिविषयोऽभूच्चेति श्रूयते॥

शास्त्रपाण्डित्यकवित्वयोरेकस्मिन् समावेशो विरल एव दरीदृश्यते। एतस्मिन् तदुभयमपि चकास्तीत्यसंशयम्। भक्तकविरसौ क्रैस्तवाब्दे षोडश सप्तदशशतकयो: जीवितम् अधारयद् इति केषाञ्चिन्मतम्॥

## परिशीलनम् ।

१. श्रीनारायणभट्टस्य बाल्यदशां विवृणुत ।

२. भट्टपादस्य कति गुरव आसन्? ते च के?

३. अम्बरधुनीनाथस्य आस्थानपण्डितत्वादिकं कथं लब्धं भट्टपादेनेति विशदयत ।

४. अनेन कति ग्रन्थाः व्यरच्यन्तेति, तेषु कस्य वा प्राधान्यमिति च सयुक्तिकं वदत ।

५. श्रीभट्टपादस्य गुरुभक्तिम्, ईश्वरभक्तिं च स्पष्टयत ।

## चतुर्दशः पाठः

# उत्तङ्कस्य गुरुदक्षिणा ।

[धौम्यशिष्यस्य वेदस्य महर्षेः शिष्यः उत्तङ्कः गुरुशुश्रूषां कुर्वन् विद्या अभ्यस्तवान्। तदनन्तरं गुरुणा गृहं गन्तुमनुज्ञातः स गुरुपत्नीवाञ्छिते पौष्यराजपत्न्या धारिते कुण्डले सम्पाद्य गुरुदक्षिणां कृत्वा गृहं प्रतिनिवृत्त इत्युच्यते।]

वेदः " भो यत् किञ्चिदस्मद्गृहे परिहीयते, तदिच्छाम्यहमपरिहीयमानं भवता क्रियमाणम् " इत्येवमुत्तङ्कं प्रति सन्दिश्य प्रवासं जगाम। अथोत्तङ्कः गुरुनियोगमनुतिष्ठन् गुरुकुले वसति स्म॥

तस्य पुनरुपाध्यायः कालान्तरेण गृहमाजगाम प्रवासात्। स तु वृत्तं तस्याशेषमुपलभ्य प्रीतिमानभूत्। उवाच चैनं वत्सोत्तङ्क किं ते प्रियं करवाणीति। धर्मतो हि शुश्रूषितोऽस्मि भवता। तेन प्रीतिः परस्परेण नौ संवृद्धा। तदनुजाने भवन्तम्। सर्वानेव कामानवाप्स्यसि। गम्यतामिति॥

स एवमुक्तः प्रत्युवाच। किं ते प्रियं करवाणीति॥

अहमनुज्ञातो भवतेच्छामीष्टं गुर्वर्थमुपहर्तुमिति। तेनैवमुक्त उपाध्यायः प्रत्युवाच। वत्सोत्तङ्क उष्यतां तावदिति॥

स कदाचिदुपाध्यायमाहोत्तङ्कः। आज्ञापयतु भवान्, किं ते प्रियमुपहरामि गुर्वर्थमिति॥

तमुपाध्यायः प्रत्युवाच। वत्सोत्तङ्क बहुशो मां चोदयसि गुर्वर्थमुपहरामीति। तद्गच्छैनां प्रविश्योपाध्यायानीं पृच्छ किमुपहरामीति॥

एषा यद् ब्रवीति, तदुपाहरस्वेति। स एवमुक्त उपाध्यायेनोपाध्यायानीमपृच्छत्। भगवत्युपाध्यायेनास्म्यनुज्ञातो गृहं गन्तुम्। इच्छामीष्टं ते गुर्वर्थमुपहृत्यानृणो गन्तुमिति॥

तदाज्ञापयतु भवती किमुपहरामि गुर्वर्थमिति। सैवमुक्तोपाध्यायानी तमुत्तङ्कं प्रत्युवाच। गच्छ पौष्यं प्रति राजानं कुण्डले भिक्षितुं तस्य क्षत्रियया पिनद्धे॥

ते आनयस्व। चतुर्थेऽहनि पुण्यकं भविता। ताभ्यामाबद्धाभ्यां शोभमाना ब्राह्मणान् परिवेष्टुमिच्छामि। तत् सम्पादयस्व। एवं हि कुर्वतः श्रेयो भविता। अन्यथा कुतः श्रेय इति॥

स एवमुक्तस्तया प्रातिष्ठतोत्तङ्कः। स पथि गच्छन्नपश्यदृषभमतिप्रमाणं, तमधिरूढं च पुरुषमतिप्रमाणमेव। स पुरुष उत्तङ्कमभ्यभाषत॥

भो उत्तङ्क एतत्पुरीषमस्य ऋषभस्य भक्षयस्वेति। स एवमुक्तो नैच्छत्। तमाह पुरुषो भूयो भक्षयस्वोत्तङ्क। मा विचारय। उपाध्यायेनापि ते भक्षितं पूर्वमिति॥

स एवमुक्तो बाढमित्युक्त्वा तदा तद्वृषभस्य मूत्रं पुरीषं च भक्षयित्वोत्तङ्कः सम्भ्रमादुत्थित एवाप उपस्पृश्य प्रतस्थे ॥

यत्र स क्षत्रियः पौष्यस्तमुपेत्यासीनमपश्यदुत्तङ्कः। स उत्तङ्कस्तमुपेत्याशीभिरभिनन्द्योवाच ॥

अर्थी भवन्तमुपागतोऽस्मीति। स एनमभिवाद्योवाच भगवन् पौष्यः खल्वहं किं करवाणीति ॥

तमुवाच गुर्वर्थं कुण्डलयोरर्थेनाभ्यागतोऽस्मीति। ये वै ते क्षत्रियया पिनद्धे कुण्डले, ते भवान् दातुमर्हतीति ॥

तं प्रत्युवाच पौष्यः प्रविश्यान्तःपुरं क्षत्रिया याच्यतामिति। स तेनैवमुक्तः प्रविश्यान्तःपुरं क्षत्रियां नापश्यत् ॥

स पौष्यं पुनरुवाच न युक्तं भवताहमनृतेनोपचरितुम्। न हि तेऽन्तःपुरे क्षत्रिया सन्निहिता। नैनां पश्यामि ॥

स एवमुक्तः पौष्यः क्षणमात्रं विमृश्य उत्तङ्कं प्रत्युवाच। नियतं भवानुच्छिष्टः। स्मर तावत् न हि सा क्षत्रिया उच्छिष्टेनाशुचिना शक्या द्रष्टुं पतिव्रतात्वात्। सैषा नाशुचेर्दर्शनमुपैतीति ॥

अथैवमुक्त उत्तङ्कः स्मृत्वोवाच। अस्ति खलु मयोत्थितेन उपस्पृष्टं गच्छता चेति। तं पौष्यः प्रत्युवाच। एष ते व्यतिक्रमः नोत्थितेनोपस्पृष्टं भवतीति शीघ्रं गच्छता चेति ॥

अथोत्तङ्कस्तं तथेत्युक्त्वा प्राङ्मुख उपविश्य सुप्रक्षालितपाणिपादवदनो निश्शब्दाभिरफेनाभिरनुष्णाभिर्हृद्गताभिरद्भिः त्रिः पीत्वा द्विः परिमृज्य खान्यद्भिरुपस्पृश्य च अन्तःपुरं विवेश। ततस्तां क्षत्रियामपश्यत्। सा च दृष्ट्वैवोत्तङ्कं प्रत्युत्थाय अभिवाद्य उवाच। स्वागतं ते भगवन्नाज्ञापय किं करवाणीति॥

स तामुवाच। एते कुण्डले गुर्वर्थं मे भिक्षिते दातुमर्हसीति। सा प्रीता तेन तस्य सद्भावेन पात्रमयमनतिक्रमणीयश्चेति मत्वा ते कुण्डले अवमुच्य अस्मै प्रायच्छत्। आह च तक्षको नागराजः सुभृशं प्रार्थयति। अप्रमत्तो नेतुमर्हसीति॥

स एवमुक्तस्तां क्षत्रियामुवाच। भगवति सुनिर्वृता भव। न मां शक्तस्तक्षको नागराजो धर्षितुमिति॥

एवमुक्त्वा तां क्षत्रियामामन्त्र्य प्रातिष्ठतोत्तङ्कः ते कुण्डले गृहीत्वा। सोऽपश्यदथ पथि नग्नं क्षपणकमागच्छन्तं मुहुर्मुहुर्दृश्यमानमदृश्यमानं च॥

अथोत्तङ्कस्ते कुण्डले संन्यस्य भूमावुदकार्थं प्रचक्रमे। एतस्मिन्नन्तरे स क्षपणकस्त्वरमाण उपसृत्य ते कुण्डले गृहीत्वा प्राद्रवत्॥

तमुत्तङ्कोऽभिसृत्य कृतोदककार्यः शुचिः प्रयतो नमो देवेभ्यो गुरुभ्यश्च कृत्वा महता जवेनान्वयात् ॥

तस्य तक्षको दृढमासन्नः। स तं जग्राह। गृहीतमात्रः स तद्रूपं विहाय तक्षकस्वरूपं कृत्वा सहसा धरण्यां विवृतं महाबिलं प्रविवेश ॥

प्रविश्य च नागलोकं स्वभवनमगच्छत्। अथोत्तङ्कस्तस्याः क्षत्रियाया वचः स्मृत्वा तं तक्षकमन्वगच्छत् ॥

तं बिलं दण्डकाष्ठेन चखान। न चाशकत्। संक्लिश्यमानमिन्द्रोऽपश्यत्। स वज्रं प्रेषयामास, गच्छास्य ब्राह्मणस्य सहाय्यं कुरुष्वेति ॥

अथ वज्रं दण्काष्ठमनुप्रविश्य तद् बिलमदारयत् ॥

तमुत्तङ्कोऽनुप्रविवेश। तेनैव बिलेन प्रविश्य च तं नागलोकमनेकविधप्रासादहर्म्यवलभीनिर्यूहशतसङ्कुलमपश्यत् ॥

स तत्र नागांस्तानस्तुवत्। स्तुवन्नपि नागान् यदा ते कुण्डले नालभत, तदैकं पुरुषमपश्यदश्वं च दर्शनीयम् ॥

स तं तुष्टाव। ततः स एनं पुरुषः प्राह। प्रीतोऽस्मि तेऽहमनेन स्तोत्रेण। किं ते प्रियं करवाणीति। स तमुवाच! नागा मे वशमीयुरिति। स चैनं पुरुषः पुनरुवाच। एतमश्वमपाने धमस्वेति ॥

ततोऽश्वस्यापानमधमत्। ततोऽश्वाद्धम्यमानात् सर्वस्रोतोभ्यः पावकार्चिषः सधूमा निष्पेतुः॥

ताभिर्नागलोक उपधूपितेऽथ सम्भ्रान्तस्तक्षकोऽग्नेस्तेजोभयाद् विषण्णः कुण्डले गृहीत्वा सहसा भवनान्निष्क्रम्य उत्तङ्कमुवाच। इमे कुण्डले गृह्णातु भवानिति॥

ते प्रतिजग्राहोत्तङ्कः। प्रतिगृह्य च कुण्डले अचिन्तयत्। अद्य तत् पुण्यकमुपाध्यायान्याः। दूरं चाहमभ्यागतः। कथं स सम्भावयेयमिति॥

तत एनं चिन्तयानमेव स पुरुष उवाच। उत्तङ्क एनमेवाश्वमधिरोह। त्वां क्षणेनैव उपाध्यायकुलं प्रापयिष्वतीति॥

स तथेत्युक्त्वा तमश्वमधिरुह्य प्रत्याजगामोपाध्यायकुलम्। उपाध्यायानी च स्नाता केशानावपयन्ती उपविष्टा उत्तङ्को नागच्छतीति शापायास्य मनो दधे॥

अथ तस्मिन्नन्तरे स उत्तङ्कः प्रविश्य उपाध्यायकुलमुपाध्यायानीमभ्यवादयत्। ते चास्यै कुण्डले प्रायच्छत्। सा चैनं प्रत्युवाच। उत्तङ्क देशे काले अभ्यागतः। स्वागतं ते। वत्स त्वमनागसि मया न शप्तः। श्रेयस्तवोपस्थितम्। सिद्धिमवाप्नुहीति॥

अथोत्तङ्क उपाध्यायमभ्यवादयत्। तमुपाध्यायः प्रत्युवाच। वत्सोत्तङ्क स्वागतं ते। किं चिरं कृतमिति॥

तमुत्तङ्क उपाध्यायं प्रत्युवाच। भोस्तक्षकेण मे नागराजेन विघ्नः कृतोऽस्मिन् कर्मणि। तेनास्मि नागलोकं गतः॥

तत्र च पुरुषो मया दृष्टः। स कः? अश्वश्चातिप्रमाणो दृष्टः स चापि कः?

पथि गच्छता च मया ऋषभो दृष्टः। तं च पुरुषोऽधिरूढः तेनास्मि सोपचारमुक्तः उत्तङ्क अस्य ऋषभस्य पुरीषं भक्षय, उपाध्यायेनापि ते भक्षितमिति॥

ततस्तस्य वचनान्मया तदृषभस्य पुरीषमुपभुक्तम्। स चापि कः? तेनैवमुक्त उपाध्यायः प्रत्युवाच। यः पुरुषः स पर्जन्यः। योऽश्वः सोऽग्निः। य ऋषभस्त्वया पथि दृष्टः स ऐरावतो नागराट्। यश्चैनमधिरूढः पुरुषः स चेन्द्रः। यदपि ते भक्षितमृषभस्य पुरीषं तदमृतम्। तेन खल्वसि नागभवने न व्यापन्नस्त्वम्॥

स हि भगवानिन्द्रो मम सखा। त्वदनुक्रोशादिममनुग्रहं कृतवान्। तस्मात् कुण्डले गृहीत्वा पुनरागतोऽसि॥

तत् सौम्य गम्यताम्। अनुजाने भवन्तम्। श्रेयोऽवाप्स्यसीति। स उपाध्यायेनानुज्ञातो भगवानुत्तङ्कः क्रुद्धस्तक्षकं प्रतिचिकीर्षमाणो हस्तिनपुरं प्रतस्थे॥

[महाभारतम्]

## परिशीलनम् ।

१. उत्तङ्केन पौष्यपत्नीकुण्डलानयने बीजं वदत ।

२. उत्तङ्कः प्रथमं पौष्यपत्नीं कुतो नापश्यत्? पुनः कथमपश्यच्च?

३. कुण्डले केन कदा कथमपहृते?

४. विनष्टे कुण्डले कथं पुनरानीते?

५. कुण्डलयोः पुनरानयनार्थमुत्तङ्कस्य के के सहायभूत आसन्?

६. उत्तङ्को नागभवने कुतो न व्यापन्नः?

## पञ्चदशः पाठः

# कर्णाश्वत्थामविवादः ।

(कर्णाश्वत्थामाभ्यां सह कृपदुर्योधनौ प्रविशतः)

कृपः—राजन्, सुमहान् खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभारः। तदहमेवं मन्ये, भवता बद्धपरिकरोऽयमुच्छेत्तुं लोकत्रयमपि समर्थः। किं पुनर्यौधिष्ठिरबलम्। अतोऽभिषिच्यतां सैनापत्ये॥

दुर्योधनः—सुष्ठु युज्यमानमभिहितं युष्माभिः। किन्तु प्राक् प्रतिपन्नोऽयमर्थोऽङ्गराजस्य॥

कृपः—राजन्, असदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितुं युक्तम्। अस्यापि तदेवारातिकुलमनुशासनीयम्।

अश्वत्थामा—राजन्, किमद्यापि युक्तायुक्तविचारणया। अद्य भुवनमकेशवमपाण्डवं च कृत्वा इयं रणकथा परिसमाप्यते॥

कर्णः—(विहस्य) वक्तुं सुकरमिदं दुष्करमध्यवसितुम्। बहवः कौरवबलेऽस्य कर्मणः शक्ताः॥

अश्वत्थामा—अङ्गराज, एवमिदम्। बहवः कौरवबलेऽत्र शक्ताः। किन्तु दुःखोपहतः शोकावेगवशाद् ब्रवीमि। न पुनर्वीरजनाधिक्षेपेण॥

कर्णः—मूढ, दुःखितस्याश्रुपातः। कुपितस्य चायुधद्वितीयस्य सङ्ग्रामावतरणमुचितम्। नैवंविधाः प्रलापाः॥

अश्वत्थामा—(सक्रोधम्) अरे रे राधागर्भभारभूत, सूतापसद, ममापि नामाश्वत्थाम्नो दुःखितस्याश्रुभिः प्रतिक्रियामुपदिशसि। न शस्त्रेण। पश्य। न मे तवेवायुधं गुरुशापेन निर्वीर्यम्। अपि च, नाहं सारथिकुले जातः॥

कर्णः—(सक्रोधम्) अरे रे वाचाट, वृथाशस्त्रग्रहणदुर्विदग्ध, वटो,

निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम्।
यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना॥

अपि च,

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म, मदायत्तं तु पौरुषम्॥

अश्वत्थामा—(सक्रोधम्) अरे रे रथकारकुलकलङ्क, अरे राधागर्भभारभूत, आयुधानभिज्ञ, तातमप्यधिक्षिपसि? स भीरुः शूरो वा भवतु। तेन आजौ प्रतिदिनं यत् कृतम्, तद् वसुधा वेत्ति। शस्त्रं कथं परित्यक्तमित्यत्र सत्यव्रतः पृथासूनुः साक्षी। रणभीरो, तदा त्वं कुत्रासीः?

कर्णः—(विहस्य) एवं भीरुरहम्। त्वं पुनर्विक्रमैकरसं स्वपितरमनुस्मृत्य न जाने किं करिष्यसीति। महान् मे संशयो जातः। अपि च, रे मूढ, शस्त्रं उज्झितं चेदपि अशस्त्रपाणयः सायुधानरीन् न निवारयन्ति किम्? अनेन पुनर्मौलिदलनेऽपि सुचिरं स्त्रियेव उदासितम्॥

अश्वत्थामा—(सक्रोधं सकम्पं च) दुरात्मन्, राजवल्लभ, प्रगल्भ, सूतापसद, असम्बद्धप्रलापिन् मम पित्रा दुखिना भीरुणा वा द्रुपदतनयपाणिर्न निषिद्धः। भुजबलशालिनस्तव शिरसि एष वामश्चरणो न्यस्यते। एनं वारय ॥

(इति तथा कर्तुमिच्छति)

कृपदुर्योधनौ—वत्स, मर्षय मर्षय। (इति निवारयतः)

(अश्वत्थामा चरणप्रहारं नाटयति)

कर्णः—(सक्रोधमुत्थाय खड्गमाकृष्य) अरे दुरात्मन्, ब्रह्मबन्धो,

जात्या काममवध्योऽसि चरणन्त्विदमुद्धृतम्।
अनेन लूनं खड्गेन पतितं द्रक्ष्यसि क्षितौ ॥

अश्वत्थामा—अरे मूढ, जात्या काममवध्योऽहम्। इयं सा जातिः परित्यक्ता। (इति यज्ञोपवीतं छिनत्ति। पुनश्च सक्रोधम्)

अद्य मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते मया।
शस्त्रं गृहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥

[उभावपि खड्गमाकृष्यान्योन्यं प्रहर्तुमुद्यतौ। कृपदुर्योधनौ निवारयतः।]

दुर्योधनः—आचार्यपुत्र, शस्त्रग्रहणेनालम् ॥

कृपः—वत्स, सूतपुत्र, शस्त्रग्रहणेनालम् ॥

अश्वत्थामा—मातुल, मातुल, किं निवारयसि? अयमपि तातनिन्दाप्रगल्भः सूतापसदो धृष्टद्युम्नपक्षपात्येव ॥

कर्णः—राजन्, न खल्वहं निवारयितव्यः। अवज्ञया धीरसत्त्वैरुपेक्षितानां मन्दानामेषा विकत्थना भवति॥

अश्वत्थामा—राजन्, मुञ्च मुञ्चैनम्। आसादयतु मद्भुजान्तरनिष्पेषसुलभम् असूनामवसादनम्। (इति प्रहर्तुमिच्छति)

कर्णः—(खड्गमुद्यम्य) अरे वाचाट, ब्राह्मणाधम, अयं न भवसि। राजन्, मुञ्च मुञ्च। न खल्वहं वारयितव्यः। (हन्तुमिच्छति)

(दुर्योधनकृपौ निवारयतः)

दुर्योधनः—कर्ण, गुरुपुत्र कोऽयमद्य युवयोर्व्यामोहः?

कृपः—वत्स, अन्यदेव प्रस्तुतमन्यत्रावेग इति कोऽयं व्यामोहः? स्वबलव्यसनं चेदमस्मिन् काले राजकुलस्यास्य युष्मत्त एव भवतीति वामः पन्थाः॥

(नेपथ्ये)

भो भो राधेयदुर्योधनसौबलप्रभृतयः पाण्डवविद्वेषिणश्चापपाणयो मानधनाः श्रृण्वन्तु भवन्तः।

स्पृष्टा येन शिरोरुहे नृपशुना पाञ्चालराजात्मजा
येनास्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः।
यस्योरस्थलशोणितासवमहं पातुं प्रतिज्ञातवान्
सोऽयं मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः॥

[सर्वे आकर्णयन्ति]

अश्वत्थामा—(सोत्प्रासम्) अङ्गराज, सेनापते, जामदग्न्यशिष्य, द्रोणोपहासिन् इदं तदासन्नतरमेव संवृत्तम्। रक्षैनं साम्प्रतं भीमाद्दुःशासनम् ॥

कर्णः—आः का शक्तिर्वृकोदरस्य मयि जीवति दुःशासनस्य छायामप्याक्रमितुम्। युवराज, न भेतव्यं न भेतव्यम्। अयमहमागतोऽस्मि ॥

[इति निष्क्रान्तः]

अश्वत्थामा—राजन्, कौरवनाथ, अभीष्मद्रोणं सम्प्रति कौरवबलमालोडयन्तौ भीमार्जुनौ राधेयेनैवं विधेनान्येन वा न शक्येते निवारयितुम् ॥

कृपः—राजन्, आचार्यपुत्र, गच्छामो वयमत्र प्रतिविधातुम् ॥

दुर्योधनाश्वत्थामानौ—तथैव ॥

[इति निष्क्रान्ताः सर्वे]

[वेणीसंहारम्]

## परिशीलनम्।

१. कर्णाश्वत्थाम्नोर्मिथः कलहे बीजं वदत।
२. कर्णो द्रोणस्य भीरुत्वं कथं वर्णयति ?
३. कर्णाश्वत्थाम्नोः कलहः कथमवसितः ?

## षोडशः पाठः

# पादुकापट्टाभिषेकः ।

अयोध्याधिपतौ दशरथे पुत्रशोकेन दिवं गते वसिष्ठवचनान्मातुलगृहाद् दूतैरानीतौ भरतशत्रुघ्नौ पितुर्मरणवार्त्तां तत्कारणं चावगत्य सन्तप्तौ भृशं रुरुदतुः। कैकेयीमतीवाभर्त्सयेतां च। दीनदीनौ विलपन्तौ पित्रर्थमुदकञ्च चक्रतुः। तदनन्तरं वसिष्ठादीनां सान्त्वनवाक्यान्यनादृत्य धर्मविद् ज्येष्ठभक्तश्च भरतो राज्ये राममेवानीयाभिषेक्तुं निश्चिकाय। तदर्थं वसिष्ठादिभिर्गुरुभिः अमात्यैः मातृादिभिः शत्रुघ्नेन सैन्यैश्च सह वनं प्रातिष्ठत ॥

गुहेन प्रदर्शितपथः क्रमेण भरद्वाजाश्रमं प्राप । तत्र च ऋषिवचनगौरवाद् दुःखितोऽपि तत्कृतातिथ्यं स्वीकृत्य एकां रात्रिमुवास। परेद्यवि भरद्वाजनिर्दिष्टं मार्गमाश्रित्य चित्रकूटपर्वतं प्राप। तत्र च धूमोद्गमनदर्शनेन रामाश्रमं विज्ञाय सैन्यानि कुत्रचित् संस्थाप्य मात्राद्यानयनार्थं शत्रुघ्नं समादिश्य च भरतो द्रुततरं गच्छन् पर्णशालां जगाहे। सैन्यसमागमं दूरतः पश्यन्तं को

वा किमर्थं वा समायातीति सन्दिहानं च ज्येष्ठभ्रातरमुपेत्य पादयोः पपात प्ररुरोद च। क्रमेण चेतरेऽपि पर्णशालां प्रापुः॥

पादयोः पतित्वा विलपन्तं भरतं भ्रातृवत्सलो दाशरथिरुत्थाप्य समीप उपवेश्य पितुः मातॄणां ज्ञातीनां प्रजानां च कुशलं पप्रच्छ। भरतस्तु तदन्तरे शोकावेगं नियमयन् सगद्गदमवोचत्। भ्रातः अस्माकं प्रियतरः पिता कैकेयीमूलकं पुत्रदुःखमसहमानः "हा राम, हा सीते, हा लक्ष्मण" इति विलपन् दिवं गतः इति॥

श्रुत्वा तु तामशनिनिपाततुल्यां स्वर्लोकप्राप्तिवार्तां पितू रामो मोहमुपगम्य भूमौ निश्चेष्टः पपात सलक्ष्मणः। मुहूर्तादनन्तरं प्रबुद्धो मुक्तकण्ठं रुरोद च। पुनर्भरतप्रेरितौ तौ गङ्गायां पित्र उदकं चक्रतुः। अथ तौ ज्ञातिभिरन्यैश्च सह सम्भाषमाणौ सह्यवेदनावभूताम्॥

तदा कैकेयीसुतः अयोध्यां समागम्य राज्यं कर्तुं रामं सविनयं प्रार्थयत। रामस्तु, "पितुः सत्यं रक्षितव्यम्। तदर्थं चतुर्दशवर्षाणि मया वन एव वस्तव्यम्। त्वं प्रजाः सम्यक् परिपालय" इति प्रत्युवाच। तच्छ्रुत्वा भ्रातृभक्तो भरतः समभाषत। कथं ज्येष्ठपुत्रे राज्याधिकारिणि जीवत्यनधिकारी द्वितीयपुत्रोऽहं भूमिं वरयित्वा परिवेत्ता भविष्यामि। अपि च प्रजाः ज्ञातयो गुरवश्च त्वां भुवो वोढारं प्रत्यवेक्षन्ते। न मयैकेन प्रजाः पालयितुं शक्यन्ते। अथवा अहं चतुर्दश वर्षाणि वने वसेयम्। भवान्

राज्यं गत्वा प्रजाः परिपालयतु। यद्येवं न कुर्यास्तर्हि अत्रैव भवन्तं शुश्रूषमाणो वर्तेय इति॥

एतच्छ्रुत्वा रामो बभाषे--पितुः सत्यस्य परिरक्षणे सर्वेपि पुत्रा अधिकारिणः। पित्रा त्वं राज्यभारे नियुक्तः। अहं च वनवासे। तत्तथैवावाभ्यामनुष्ठातव्यम्। अन्यथा पितुरानृण्याभावात् स्वर्गलब्धिर्न स्यात्। मन्त्रिभिः पुरोहितैर्विज्ञैश्च सह सम्यङ्मन्त्रयित्वा राज्यं बिभृयाश्चेत् प्रजाः सर्वाः सन्तुष्येयुः। तस्मात् प्रतिगच्छायोध्यामिति॥

"गुरुभूतस्य मम वचनमादरणीयम्। तद्गच्छायोध्यां राम, राज्यं कुरु" इति वसिष्ठेनोक्तमपि कौसल्यानन्दनेन प्रत्याख्यायि॥

एवं स्वप्रार्थनामवधीरयति रामे भरतः आप्रसादान्निराहार आर्यं प्रत्युपवेक्ष्यामि। तच्छीघ्रं कुशानास्तरास्मिन् स्थण्डिल इति सारथिं सुमन्त्रमवोचत्। तदा राममवेक्षमाणं सुमन्त्रं प्रेक्ष्य दुःखितमनाः स्वयमेव कुशानास्तीर्य भूमावेवावस्थितः॥

भरते प्रत्युपवेशनार्थमारब्धवति सति राजर्षिसत्तमो रामोऽभ्यधात् "ब्राह्मणानामेवैतद्व्रतं विहितम्। न तु राजन्यकानाम्। कृत्वा चैतद्व्रतं क्षत्रियः प्रायश्चित्तमर्हति। तदुत्तिष्ठ वत्स। मां स्पृष्ट्वोदकं च स्पृश" इति। पौरजानपदा जनाश्च तदेवान्ववादिषुः। भरतस्तत उत्थाय जलं स्पृष्ट्वा दीनवदनः किंकर्तव्यतामूढः कांश्चन क्षणांस्तस्थौ॥

भूयोऽपि रुदन्तं पादयोर्निपत्य राज्यभारस्वीकारार्थं प्रार्थयमानं भरतं समाश्वासयन् कौसल्यासूनुरब्रवीत्। वत्स, नात्र निर्बन्धः कार्यः। प्रतिगच्छायोध्याम्। अमात्यैः सह सम्मन्त्र्य प्रकृती रक्षित्वा राज्यं कुरु। कैकेयीं मा गर्हय। यथा सागरो वेलां न अतीयात्, तथाहं पितुः प्रतिज्ञामपि। पितृनियोगं परिरक्ष्य चतुर्दशवर्षानन्तरं नगरं प्राप्य त्वया सह राज्यं करिष्यामि इति॥

एवं तर्ह्यार्यः सतेजसी हेमभूषिते पादुके आरोहतु। एते सर्वलोकस्य योगक्षेमं विधास्यत। चतुर्दश वर्षाणि जटाचीरधरः फल-मूलाशनो नगराद् बहिरेतयो राज्यतन्त्रं विन्यस्य तवागमनमा-काङ्क्षन् वत्स्यामि। चतुर्दशे वर्षे सम्पूर्णे त्वां यदि न द्रक्ष्यामि तर्हि हुताशनं प्रवेक्ष्यामि इति रामानुजोऽवादीत्॥

तथा इति प्रतिज्ञाय राघवः पादुके आरुह्य व्यवमुच्य च भरताय प्रादात्। कौसल्यासुमित्रे इव कैकेयीमपि रक्षतम्। मा तां प्रति रोषं कुरुतमिति भरतशत्रुघ्नौ समादिशच्च। अथानुपूर्व्येण गुर्वादीन् प्रतिपूज्य च अश्रूणि मुञ्चन् सर्वानपि विससर्ज॥

सप्रणामं पादुके परिगृह्य स्वलङ्कृते शिरसि धारयन् रामं गिरिं च प्रदक्षिणीकृत्य रथमारुह्य अनुयायिभिर्दुःखितैः सह भरत अयोध्यां प्रातिष्ठत। तां प्राप्य मातृस्तत्रोऽपवेश्य सशत्रुघ्नो नन्दिग्रामं प्राप। तत्र विन्यस्य पादुके राजोचितविधिनाऽभिषिच्य छत्रं चामरे च धारयित्वा राज्यतन्त्रं तयोः समर्प्य स्वयं जटाचीरधारी संन्यास-वृत्तिमुररीकृत्य तत्तत्समये तत्तत्कार्याणि ते विज्ञाप्य च राज्यं बभार॥

## परिशीलनम् ।

१. भरतस्य चित्रकूटयात्रां विवृणुत।

२. भरतो रामस्यानयनार्थं तन्निकटे किं किमवदत्?

३. रामो भरतं कथं समाश्वासितवान्?

४. पादुके आदाय भरतः किमकरोत्?

५. भरतस्य ज्येष्ठभक्तिं विवृणुत।

६. रामः प्रत्युपवेशनाद् भरतं कथं निवर्तयामास?

सप्तदशः पाठः

# किं गृहिणः प्रियाय दारगुणाः ।

अस्ति द्रविडेषु काञ्ची नाम नगरी। तस्यां अनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत्। सोऽष्टादशवर्षदेशीयश्चिन्तामापेदे। "नास्त्यदाराणाम् अननुगुणदाराणां वा सुखं नाम। तत्कथं नु गुणवद्विन्देयं कलत्रम्?" इति। अथ परप्रत्ययाहृतेषु दारेषु यादृच्छिकीं संपत्तिमनभिसमीक्ष्य कार्तान्तिको[1] नाम भूत्वा वस्त्रान्तपिनद्धशालिप्रस्थो भुवं बभ्राम। "लक्षणज्ञोऽयम्" इत्यमुष्मै कन्याः कन्यावन्तः प्रदर्शयांबभूवुः। यां काञ्चिल्लक्षणवतीं सवर्णां कन्यां दृष्ट्वा स किल स्म ब्रवीति—"भद्रे! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नमस्मानभ्यवहारयितुम्?" इति। स हसितावधूतो गृहाद्गृहं प्रविश्याभ्रमत्। एकदा तु कावेरीतीरपत्तने सह पितृभ्याम् अवसितमहर्द्धिम् अवशीर्णभवनसारां धात्र्या प्रदर्श्यमानां काञ्चन विरलभूषणां कुमारीं ददर्श। अस्यां संसक्तचक्षुश्चातर्कयत्—"अस्याः खलु कन्यकायाः सर्व एवावयवा नातिस्थूला नातिकृशा नातिह्रस्वा नातिदीर्घा न विकटाश्च। सेयमाकृतिर्न व्यभिचरति शीलम्। आसज्जति च मे हृदयमस्यामेव। तत् परीक्ष्यैनामुद्वहेयम्। अविमृश्यकारिणि हि नियतमनेकाः पतन्त्यनुशय[2]परम्पराः" इति। स्निग्धदृष्टिराचष्ट च ताम्—"भद्रे! कच्चिदस्ति कौशलं शालिप्रस्थेनानेन सम्पन्नमाहारमस्मानभ्यवहारयितुम्।" इति। ततस्तया वृद्धदासी साकूत[3]मालोकिता। तस्य हस्तात् प्रस्थ[4]मात्रं धान्यमादाय क्वचिदलिन्दो[5]द्देशे सुसिक्तसंमृष्टे दत्तपादशौचमुपावेशयत्। सा कन्या

---

1. लक्षणज्ञः। 2. पश्चात्तापः। 3. साभिप्रायं। 4. मानविशेषः। 5. अलिन्दः=देहली।

तान् गन्धशालीन् संक्षुद्य मात्रया विशोष्यातपे मुहुर्मुहुः परिवर्त्य स्थिरसमायां भूमौ नालीपृष्ठेन मृदुमृदु घट्टयन्ती तुषैरखण्डैस्तण्डुलान् पृथक्चकार। जगाद च धात्रीम्—"मातः! एभिस्तुषैरर्थिनो भूषण-मृजाक्रियाक्षमैः सुवर्णकाराः। तेभ्य इमान्दत्वा लब्धाभिः काकिणीभिः[1] स्थिरतराण्यनत्यार्द्राणि नातिशुष्काणि काष्ठानि मितंपचां स्थालीमुभे शरावे चाहर" इति। तथा कृते तया तांस्तण्डुलान् उलूखले लोहपत्रवेष्टितमुखेन समशरीरेण व्यायतेन गुरुणा मुसलेन अवघट्य असकृद् अङ्गुलीभिः उद्धृत्योद्धृत्य अवहत्य शूर्पशोधितकणकिंशारु[2]-कान् तण्डुलान् अद्भिः प्रक्षाल्य क्वथितपञ्चगुणे जले दत्तचुल्लीपूजा प्राक्षिपत्। प्रश्लथावयवेषु प्रस्फुरत्सु तण्डुलेषु मुकुलावस्थामतिवर्तमानेषु संक्षिप्यनलमुपहितमुखपिधानायाः स्थाल्या अन्नमण्डमगालयत्[3]। दर्व्या चावघाट्य मात्रया परिवृत्य समपक्वेषु सिक्थेषु स्थालीमधोमुखी-मवातिष्ठिपत्। इन्धनान्यन्तःसाराण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीनि कृष्णाङ्गारीकृत्य तदर्थिभ्यः प्राहिणोत्। "एभिर्लब्धाः काकिणीर्दत्वा शाकं घृतं दधि तैलमामलकं चिञ्चाफलं च यथालाभमानय" इति। तथानुष्ठिते च तया द्वित्रानुपदंशानुपपाद्य, तदन्नमण्डम् आर्द्रवालु-कोपहितनवशरावगतम् अतिमृदुना तालवृन्तानिलेन शीतलीकृत्य सलवणसंभारं दत्ताङ्गारधूपवासं च सम्पाद्य, तदप्यामलकं श्लक्ष्णपिष्ट-मुत्पलगन्धि कृत्वा धात्रीमुखेन स्नानाय तमचोदयद्। तया च स्नानविशुद्धया दत्ततैलामलकः क्रमेण सस्नौ। स्नातः सिक्तमृष्टे

---

1. काकिणी=वराटकानां दशकद्वयं स्यात् सा काकिणीति भास्कराचार्यः।
2. किंशारुः=सस्यशूकम्। 3. अन्नमण्डं=भक्तपानीयम्।

कुट्टिमे[1] फलकमारुह्य पाण्डुहरितस्य त्रिभागशेषलूनस्याङ्गणकदलीपलाशस्योपरि दत्तशरावद्वयमार्द्रमभिमृशन्नतिष्ठत्। सा तु तां पेयामेवाग्रे समुपाहरत्। पीत्वा चापनीताध्वक्लमः[2] प्रहृष्टः प्रक्लिन्नसकलगात्रः स्थितोऽभूत्। ततस्तस्य शाल्योदनस्य दर्वीद्वयं दत्वा सर्पिर्मात्रां[3] सूपमुपदंशं चोपजहार। दध्ना च सुरभि शीतलेन शेषमन्नमभोजयत्। सशेषे एवान्धसि[4] असौ अतृप्यत्। अयाचत च पानीयम्। अथ नवभृङ्गार[5]संभृतमगरुधूपधूपितम् अभिनवपाटलाकुसुमवासितम् उत्फुल्लोत्पलग्रथितसौरभं वारि नालीधारात्मना पातयांबभूव। सोऽपि मुखोपहितशरावेण हिमशिशिरकणकरालितारुणायमानाक्षिपक्ष्मा धारारवाभिनन्दितश्रवणः स्पर्शसुखोद्भिन्नरोमाञ्चकर्कशकपोलः परिमलप्रवालोत्पीडफुल्लघ्राणरन्ध्रो माधुर्यप्रकर्षावर्जितरसनेन्द्रियः तदच्छं पानीयमाकण्ठं पपौ। शिरःकम्पसंज्ञावरिता च पुनरपरकरकेणाचमनमदत्त कन्या। वृद्धया तु तदुच्छिष्टमपोह्य हरितगोमयोपलिप्ते कुट्टिमे स्वमेवोत्तरीयकर्पटं व्यवधाय क्षणमशेत। परितुष्टश्च विधिवदुपयम्य कन्यां निन्ये। सा च पतिं दैवतमिव मुक्ततन्द्रा पर्यचरत्। गृहकार्याणि चाहीनमन्वतिष्ठत्। परिजनं च दाक्षिण्यनिधिरात्माधीनमकरोत्। तद्गुणवशीकृतश्च भर्ता सर्वमेव कुटुम्बं तदायत्तमेव कृत्वा तदेकाधीनजीवितशरीरस्त्रिवर्गं निर्विवेश। अतः "गृहिणः प्रियहिताय दारगुणाः"

[दशकुमारचरितम्]

---

1. कुट्टिमः=निबन्द्धा भूमिः। 2. अध्वक्लमः=मार्गक्लेशः। 3. अल्पघृतं 4. अन्धसि ओदने। 5. भृङ्गारः कनकालुका।

## परिशीलनम् ।

१. "अस्यां संसक्तचक्षुश्च अतर्कयत्"। किमतर्कयत्?

२. "जगाद च धात्रीम्।" किं जगाद? तैश्च किं किमक्रीणात्

३. कन्यया कृष्णाङ्गाराः कथं निष्पादिताः?

४. प्रयोगविपरिणामं कुरुत—

(१) असौ पानीयमयाचत, (२) सा पतिं दैवतमिव पर्यचरत्।

५. सन्धत्त—

(१) तान्+तण्डुलान्, (२) सः+अपि,
(३) कुट्टिमे+एव, (४) तत्+अन्नम्।

६. अधोलिखितपदानामर्थान् ब्रूत—

(१) अलिन्दम्, (२) काकिणी, (३) किंशारुः,
(४) कुट्टिमः, (५) भृङ्गारः, (६) कर्पटः।

७. शक्तिकुमारेणोदूढायाः कन्यायाः के के गुणविशेषाः पाठादस्मात् प्रतीयन्ते?

---

# सुभाषितानि ।

[१] विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

[२] यद्यदाचरति श्रेष्ठस्तत्तदेवेतरे जनाः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

(भगवद्गीता)

## कालिदासः ।

[३] भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥

(शाकुन्तलम्)

[४] पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥

(मालविकाग्निमित्रम्)

## भर्तृहरिः ।

[५] प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद् भर्तुरेव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

[६] निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु ।
लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥

## भासः ।

[७] अनुचरति शशाङ्कं राहुदोषेऽपि तारा
पतति च वनवृक्षे याति भूमिं लता च ।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः ॥

(प्रतिमानाटकम्)

## भवभूतिः ।

[८] कामं दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुर्हृदो निष्प्रलान्ति ।
शुद्धां शान्तां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥

(उत्तररामचरितम्)

## भारविः ।

[९] सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

(किरातार्जुनीयम्)

## चाणक्यः ।

[१०] कुचेलिनं दन्तमलोपधारिणं
महाशनं निष्ठुरवाक्यभाषणम् ।
सूर्योदये चास्तमये च शायिनं
जहाति लक्ष्मीरपि चक्रधारिणम् ॥

(चाणक्यराजनीतिशास्त्रम्)

## श्रीशङ्करः ।

[११] गुहायां गेहे वा बहिरपि वने वाद्रिशिखरे
जले वा वह्नौ वा वसतु वसतेः किं वद फलम् ।
सदा यस्यैवान्तःकरणमपि शम्भो तव पदे
स्थितं चेद्योगोऽसौ स च परमयोगी स च सुखी ॥

## शक्तिभद्रः ।

[१२] यस्य नैसर्गिकी शोभा तत्र संस्कारमर्हति ।
कः कलां शशिनो मार्ष्टि कौस्तुभः केन रज्यते ॥

(आश्चर्यचूडामणिः)

## सुकुमारकविः ।

[१३] जनो हि यः कर्म करोति यादृशं
स सर्वथा तादृशमश्नुते फलम् ।
बलिः पुराऽबध्यत येन दानवः
स लोकनाथोऽपि तदाप बन्धनम् ॥

(श्रीकृष्णविलासम्)

## लीलाशुकः ।

[१४] अयि मुरलि मुकुन्दस्मेरवक्त्रारविन्द-
श्वसनमधुरसज्ञे त्वां प्रणम्याद्य याचे ।
अधरमणिसमीपं प्राप्तवत्यां भवत्यां
कथय रहसि कर्णे मद्दशां नन्दसूनोः ॥

(श्रीकृष्णकर्णामृतम्)

## माघकविः ।

[१५] सम्पदा सुस्थिरं मन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥

(शिशुपालवधम्)

## शूद्रकः ।

[१६] सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ॥

(मृच्छकटिकम्)

---

# अनुबन्धः

## कुमारसम्भवम् ।

[१] प्रथमाश्रम इति—(१) ब्रह्मचर्यम्, (२) गार्हस्थ्यम्, (३) वानप्रस्थम्, (४) सन्यासः इति चत्वार आश्रमाः ।

[२] 'शरीरबद्धः'—अत्र बद्धेत्यस्य उपसर्जनत्वेन पूर्वनिपाते कर्त्तव्ये, "वाहिताग्न्यादिषु" इति परनिपातः कृतः ।

[३] 'प्रचक्रमे'—प्रोपसृष्ट क्रम्‌धातोरारम्भार्थे आत्मनेपदं स्यात् ।

[४] 'प्रष्टुमनाः'—काम, मनस् इत्यनयोः परयोः तुमुनो मकारस्य लोपः स्यात् ।

[५] 'सुभ्रु'—नदीत्वनिषेधेन ह्रस्वासम्भवात् प्रमादादेवेति बहवः । केचित् सामान्ये नपुंसकत्वेन साधुत्वं कल्पयन्ति ।

[६] ‘अलं समाधिना’—निषेधार्थकस्य अलमित्यस्य योगे तृतीया स्यात्।

[७] ‘लभते स्म’—स्मेत्यव्ययस्य योगे भूते लट् स्यात्।

[८] वृद्धः उक्षा वृद्धोक्षः तं वृद्धोक्षम्। उक्षन्नित्यस्याकारान्तत्वं निपातनात् सिद्धम्।

[९] ‘महाजनः’—कर्मधारयबहुव्रीहिसमासयोः पूर्वपदभूतस्य महच्छब्दस्य आकारान्तत्वं स्यात्।

[१०] विरूपे अक्षिणी यस्य तद् विरूपाक्षम्। बहुव्रीहिसमासे उत्तरपदभूताक्षिशब्दः अक्ष इत्यकारान्तः स्यात्।

[११] ‘ईशं प्रति’—प्रतीत्यस्य योगे द्वितीया स्यात्।

---

## रामायणम्।

[२] “त्रयाणां संस्मरिष्यति” इति सम्बन्धसामान्ये षष्ठी।

[५] ‘उपचक्रमे’—उपेत्युपसर्गविशिष्ट ‘क्रम्’ धातोः आरम्भार्थे आत्मनेपदं स्यात्।

[२०] "वसैकाहमरिन्दम"—तत्पुरुषसमासान्तस्थम् अहन्नित्येतदकारान्तं स्यात्। एकाहमिति कालवाचित्वेनात्यन्तसंयोगे द्वितीया।

[२१] "रावणं जित्य संयुगे"—उपसर्गपूर्वकादेव ल्यपो विधानाद् जित्येति ल्यप आर्षत्वेन साधुत्वं वक्तव्यम्।

[४०] 'तदलं परितापेन'—पूर्वमुक्तम्।

[५२] "मा रुदो देवि शोकेन माभूत्ते मनसोऽप्रियम्"—माङो योगे लुङ् (अडागमनिषेधश्च।)

[५३] "सौमित्रिणा समः"—तुल्यार्थकशब्दयोगे तृतीया।

---

## भारतम्।

[११] "पुण्यश्लोकमृते नलम्"—पञ्चमीस्थाने द्वितीयाप्रयोग आर्षत्वात् साधुः।

[३०] 'त्वामृते न हि'—अत्रापि पूर्ववत्।

[३८] 'त्वामृते'—अत्रापि।

[३९] 'सङ्गच्छ'—अत्रात्मनेपदे कर्त्तव्ये परस्मैपदस्य च साधुता पूर्ववत्।

[४४] 'प्रत्यनन्दत'—अत्र परस्मैपदप्राप्तौ आत्मनेपदस्य च।

[४७] "साक्षिणो रक्षिणश्चास्या वयं त्रीन् परिवत्सरान्"—अत्र कालवाचिनो वत्सरशब्दाद् अत्यन्तसंयोग द्वितीया।

[४९] 'रात्रिमूषतुः'—अत्राप्यत्यन्तसंयोगे द्वितीया।

---

[१९] स मच्छरीरे त्वच्छापादित्यादिना

"उवाच भैमी निश्वस्य रुदत्यथ पतिव्रता।
यस्याभिशापाद्दुःखार्तो दुःखं विन्दति नैषधः॥

[२०] तस्य भूतस्य नो दुःखाद् दुःखमप्यधिकं भवेत्।
अपापचेतसं पापो य एवं कृतवान् नलम्॥
तस्माद्दुःखतरं प्राप्य जीवत्वसुखजीविकाम्।"

दमयन्त्या एतादृशः शापः सूचितः, स शापः कलिमबाधत॥

[२७] "वाक्यानि मम गाथाभिः।" इत्येनेन सूचिता गाथा एवाधस्तादुच्यन्ते --

अथ तानब्रवीद् भैमी सर्वराष्ट्रेष्विदं वचः।
ब्रुवध्वं जनसंसत्सु तत्र तत्र पुनः पुनः॥

क्व नु त्वं कितव छित्वा वस्त्रार्धं प्रस्थितो मम।
उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रियः॥

सा वै यथा त्वया दृष्टा तथास्ते त्वत्प्रतीक्षिणी।
दह्यमाना भृशं बाला वस्त्रार्धेनाभिसंवृता॥

तस्या रुदत्याः सततं तेऽनुशोकेन पार्थिव।
प्रसादं कुरु वै वीर प्रतिवाक्यं ददस्व च॥

एवमन्यच्च वक्तव्यं कृपां कुर्याद्यथा मयि।
वायुना धूयमानो हि वनं दहति पावकः॥

भर्तव्या रक्षणीया च पत्नी पत्या हि सर्वदा।
तन्नष्टमुभयं कस्माद् धर्मज्ञस्य सतस्तव॥

ख्यातः प्राज्ञः कुलीनश्च सानुक्रोशो भवान् सदा।
संवृत्तो निरनुक्रोशः शङ्के मद्भाग्यसङ्क्षयात्॥

तत्कुरुष्व नरव्याघ्र दयां मयि नरर्षभ।
आनृशंस्यं परो धर्मः त्वत्त एव हि मे श्रुतः॥

[२९] " तेन वाक्ये कृते सम्यक् प्रतिवाक्ये तथाहृते "—
इत्यनेन सूचितं बाहुकप्रतिवाक्यमिदम्—

वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः।
आत्मानमात्मना सत्यो जितः स्वर्गो न संशयः॥

रहिता भर्तृभिश्चैव न कुप्यन्ति कदाचन।
प्राणांश्चारित्रकवचान् धारयन्ति वरस्त्रियः॥

विषमस्थेन मूढेन परिभ्रष्टसुखेन च।
यत् सा तेन परित्यक्ता तत्र न क्रोद्धुमर्हति॥

प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः।
आधिभिर्दह्यमानस्य श्यामा न क्रोद्धुमर्हति॥

सत्कृतासत्कृता वापि पतिं दृष्ट्वा तथागतम्।
भ्रष्टराज्यं श्रिया हीनं क्षुधितं व्यसनाप्लुतम्॥

[४२] " ततस्तद्वस्त्रमजरं प्रावृणोत् " इत्यत्र सूचिता कथा सङ्गृहीताऽधः प्रदर्श्यते—

वने दमयन्तीं परित्यज्य नलः तत्र तत्र सञ्चरन्नासीत्। तदा कुत्रचिद् दावमपश्यत्। तन्मध्यादाह्वानमश्रृणोत्। तच्छ्रुत्वा तत्र गतः। तन्मध्ये नारदशापात् चलितुमप्यशक्तः कार्कोटकनामा नागराजस्तिष्ठन् नलं रक्षामयाचत। नलश्च दावान्तः प्रविश्य तं गृहीत्वाऽन्यत्र नीतवान्। नागस्तदा पदानि गणयन् गच्छेति नलमभ्यधात्। तथा कृतवति नले, दशमे पदे नागराजस्तमदशत्। सद्य एव

नलस्य रूपं विकृतमासीत्। राजन्! विषं न त्वां बाधेत। किन्तु त्वयि विद्यमानं कलिमेव। रूपविकृतेर्भवन्तं न कोऽपि जानीयात्, गच्छ कोसलान्। ऋतुपर्णं प्राप्य श्रेयोऽवाप्स्यसि। यदा स्वं रूपमावश्यकं तदा एतद्वासः मां स्मृत्वा परिधेहि इत्युक्त्वा नलस्पर्शेन मुक्तशापो नागराजः सन्तुष्टः नलं बहुधा अनुगृह्य व्यसृजन्॥

---

## इन्द्रजालप्रयोगः।

[१] दानार्थकधातोः प्रयोगे दानोद्देश्यवाचकं चतुर्थ्यन्तं स्यात्। "देहि मे वैश्वानरम्"

[२] उप, अनु, अधि, आङ् इत्येतत्पूर्वक वस् धातोः प्रयोगे आधारः कर्मसंज्ञकः स्यात्। "धरणीतलम् अधिवसामि"

[३] राजन्, अहन्, सखि इत्येतेषां तत्पुरुषसमासान्तानाम् अकारान्तत्वं स्यात्। "भोजराजः"

---

## मातलिप्रवेशः।

बहुव्रीहिसमासान्तभूतं 'धनुस्' इत्येतद् 'धन्वन्' इति स्यात्।

"आत्तं धनुर्येन सः आत्तधन्वा"।

प्रपूर्वक स्थाधातोरात्मनेपदं स्यात्। "प्रतिष्ठताम्"

---

## उपहारवर्मलाभः ।

समासान्तस्थितं "पथिन्" इत्येतद् 'पथ' इत्यकारान्तं स्यात् । "स्खलितपथः"

---

## अमृतमथनम् ।

[४] 'चिन्तयानस्य'—अत्र मुमागमाभावः आर्षः ।

[५] अह्नि भवम् आह्निकं, कृतम् आह्निकं येन तम् । अरीन् दमयतीति अरिन्दमः ।

[६] त्रीन् पथो गच्छतीति त्रिपथगा । समासे उत्तरपदभूतं 'पथिन्' इत्येतत् 'पथ' इत्यकारान्तं स्यात् ।

[८] कुशिकस्य गोत्रापत्यं पुमान् कौशिको विश्वामित्रः ।

[१०] रघोः गोत्रापत्यं पुमान् राघवः । राघवेण सह वर्त्तते इति सहराघवः । वैकल्पिकत्वात् सहेत्यस्य सादेशो न ।

[१६] न म्रियन्ते इति अमराः मरणरहिता इत्यर्थः । विगता जरा येभ्यस्ते विजराः जरारहिताः ।

[१७] क्षीरम् उदकं यस्मिन् सः क्षीरोदः तस्य मथनम्। उदक-शब्दस्य उदादेशः। रसम् अमृतरूपं रसायनम्।

[१८] योक्त्रं = मन्थनरज्जुः।

[१९] शिरांसि इत्यस्य विशेषणत्वेन वमन्त इति पुंस्त्वनिर्देशस्य आर्षत्वेन साधुत्वं वक्तव्यम्।

[२७] मन्थानः पर्वतोत्तमो मन्दरः।

[३२] अप्सराः इति आदन्ताप्सराशब्दोऽप्यस्तीत्यभिप्रायेण। अत एवानुपदमप्सराणां सुवर्चसमिति।

[३३] 'अप्सु' अप्शब्दो नित्यबहुवचनान्तः।

[३५] 'न ताः स्म प्रतिगृह्णन्ति' स्मयोगे भूते लट्।

[३७] वारुण्याः अदितिसुताङ्गीकारे हेतुरनिन्दितामिति। निषेधशास्त्रं तु मानुषविषयम्।

---

## अयोध्याकाण्डम्।

### अष्टादशाधिकशततमः सर्गः (११८)।

[१] विदेहानां राजा वैदेहाः। तस्यापत्यं स्त्री वैदेही।

[२] 'उपचक्रमे' प्र, उप, एतत्पूर्वकात् 'क्रम्' धातोरारम्भार्थे आत्मनेपदं स्यात्।

[४] "सावित्री पतिशुश्रूषां कृत्वा" इत्यत्र यातेत्युक्तिः पातिव्रत्यमहिम्ना स्वर्गस्य हस्तगतत्वादिति तीर्थः। तपोऽर्थमिह वर्त्तमानापि मूर्त्यन्तरेण दिवं यातेत्यर्थ इति कतकः।

[५] "वरिष्ठा सर्वनारीणाम्" इति निर्धारणे षष्ठी। अतिशयेन वरा वरिष्ठा।

"रोहिणी चन्द्रं विना" विनाशब्दयोगे द्वितीया।

[८] "छन्दये" वरं वृणीष्वेति प्रार्थये इत्यर्थः।

[१०] 'कृतमित्यब्रवीत्' भगवत्या अनुग्रहेणैव सर्वं मे पूर्णम्। न किञ्चित् कर्त्तव्यमस्तीति भावः।

[११] तया लोभरहितया वाचा।

[१२] "अङ्गरागः" उद्वर्त्तनेनाङ्गानि रञ्जयतीत्यङ्गरागः केशरचन्दनादिजः। कतकस्तु, अङ्गरागमङ्गरञ्जनकरमनुलेपनं दिव्यगन्धद्रव्यकत्वमित्यर्थ इत्याह।

[२२] क्षेत्रमण्डलम् यज्ञयोग्यक्षेत्रम्।

[२३] "मुष्टिविक्षेपतत्परः" "या जाता ओषधयो देवेभ्यः" इति मन्त्रोक्तप्रकारेणौषधिमुष्टिविकिरणतत्पर इति तीर्थः। निम्नोन्नतसमीकरणाय मृत्तिकामुष्टिविक्षेपतत्पर इति कतकः।

[२७] "इष्टवद्देव्यै" इष्टायै देव्यै राज्ञ्यै। इष्टमिति भावे क्तः। इष्टमिच्छा तद्वत्यै। यद्वा, सन्तानेच्छावत्यै देव्यै, पुण्यकर्मण इति देवीविशेषणम्।

[२९] "प्रधर्षणम्" असम्माननादिरूपम्।

[३०] "प्रधर्षणां' कन्यानिमित्ततिरस्क्रियाम्।

[३२] चिन्तयानस्येति मुमभाव आर्षः।

[३३] "महायज्ञे" दक्षयज्ञे। तस्य मत्पितृपूर्वजस्य देवराजस्य। तदा शत्रुजयसमर्थधनुर्लाभाय तपःकरणकाले। दक्षयज्ञे हि शिवेन पीडिता देवाः शिवं सम्प्रार्थ्य धनुर्याचितवन्तः। स च देवेभ्यो दत्वा उक्तवान्, "इदं देवराताय दीयताम्" इति। ततो देवैर्वरुणद्वारा देवराताय दत्तम्।

[३७] तोलने = चालने।

[४१] दैविकम् = देवदत्तम्।

[४६-४८] "रामाय दत्तः" —-दानार्थकधातुयोगे दानोद्देश्यवाचकं शब्दस्वरूपं चतुर्थ्यन्तं स्यात्।

## महाभारतम् ।

### आदिपर्वणि चैत्ररथपर्व ।

[चतुःसप्तत्यधिकशततमोऽध्यायः (१७४)]

[२] "परिचक्षते" परि + चक्ष्, चष्टे—चक्षाते—चक्षते ।

[५] मरुधन्वसु = निर्जलप्रदेशेषु; म्रियते पिपासया यस्मिन् सः मरुः । कर्णावतंसन्यायेन समुदितस्य निर्जलप्रदेश इत्यर्थो वक्तव्यः ।

[६] लब्धुमिच्छुः लिप्सुः, मृगाणां लिप्सुः मृगलिप्सुः । पातुमिच्छा पिपासा तया ।

अतिशयेन प्रशस्यः श्रेष्ठः । नराणां श्रेष्ठः नरश्रेष्ठः । 'आश्रमं प्रति' प्रतिशब्दयोगे द्वितीया ।

[७] पादाभ्यां हितं पाद्यं च, अर्घाय हितं अर्घ्यं च, आचमितुं योग्यम् आचमनीयं चेति द्वन्द्वः ।

[१४] पीनम् ऊधः यस्याः तां पीनोधसम् । अनङभाव आर्षः । अनङि तु पीनोध्नीमिति स्यात् ।

[१६] अर्बुदेन = दशभिः कोटिभिः ।

[१७] सम्प्रयच्छत्वेत्यात्मनेपदमार्षम्।

[२०] 'हरिष्यामीह पश्यतः'—पश्यन्तमनादृत्येत्यर्थः। अनादरे षष्ठी।

[२१] "मा त्वं विचारय" निषेधार्थको माशब्दः। न तु माङ्। अतो न लुङ्।

[२३] हम्मायमाना = हम्मेति शब्दं कुर्वाणा।

[२८] "महामुनिः" बहुव्रीहिकर्मधारययोः पूर्वपदभूतस्य महत् इत्यस्य स्थाने महा इत्याकारान्तः स्यात्।

[३५] 'मध्याह्नेः' अह्नः मध्यम् मध्याह्नः। मध्यशब्दस्य पूर्वनिपातः, अहन् इत्यस्य अह्न इत्यादेशश्च भवति।

[४०] 'विश्वामित्रस्य पश्यतः' पश्यन्तं विश्वामित्रमनादृत्येत्यर्थः।

[४३] 'त्रातारं नाध्यगच्छत' अत्रात्मनेपदस्यार्षत्वं वक्तव्यम्।

[४७] 'धिग्बलं क्षत्रियबलम्' क्षत्रियबलम् निन्द्यमित्यर्थः।

---

## वनपर्वणि द्रौपदीहरणपर्व

### [त्रिषष्ट्यधिकद्विशततमोऽध्यायः (२६३)]

[२] "शिष्यैरयुतसम्मितैः" अयुतं दशसाहस्रमित्यर्थः। युधि स्थिरः = युधिष्ठिरः। संज्ञात्वाद् हलन्तत्वाच्च सप्तम्या अलुक्।

[६]. द्रुपदस्य अपत्यं स्त्री द्रौपदी। 'योषितां वरेति' निर्धारणे षष्ठी।

[८] कंसं निषूदयति इति कंसनिषूदनः।

न व्येति इति अव्ययः। अथवा न विद्यते व्ययो यस्य स अव्ययः।

[१२] "दुःशासनादहं पुर्वं मोचिता" द्यूते पराजितेषु पाण्डवेषु सभायां महारथानां गुरूणां च पुरतः दुःशासनेन द्रौपद्याः वस्त्राक्षेपः कृतः। पुनः पुनर्वस्त्रस्याक्षेपे कृतेऽपि भगवदनुग्रहेण तस्यावसानं न जातमिति कथा सूच्यते।

[१६] क्षुधा अस्य संजाता इति क्षुधितः।

[१७] यदा पाण्डवाः समयमनुसृत्य वनवासाय प्रस्थिताः तदा बह्वीब्राह्मणा अपि तान् अनुगच्छन्ति स्म। तेषामन्नदानार्थमशक्तो धर्मपुत्रः धौम्यमहर्षेरुपदेशेन तपस्तप्त्वा सूर्यदेवं प्रसन्नमकरोत्। प्रसन्नः सूर्यस्तु अक्षयं किञ्चन ताम्रभाजनं दत्तवान्। यस्मिन् पक्वमन्नं यावत् कृष्णाभोजनं क्षयन्नाप्नुयात्। कृष्णाया भोजनानन्तरं तु अन्नमप्यवसितं भवेत्। भास्करदत्तेत्यनेन सैव स्थाली उच्यते।

[२४] अघमर्षणम् = सर्वपापविनाशकमन्त्रजपम्। 'सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम्' इत्यमरः।

[२८] "मास्मानधाक्षुः" निषेधार्थकोऽत्र माशब्दः। न तु माङ्। अतो नाडागमनिषेधः।

[२९] "स्मृत्वानुभावं राजर्षेरम्बरीषस्य"। वेलातिक्रमणेन व्रतभङ्गभिया जलेन पारणां कृतवतेऽम्बरीषाय द्रोग्धुं कृत्यां प्रयुक्तवान् दुर्वासाः। तदा अम्बरीषं रक्षितुं विष्णुचक्रमागत्य कृत्यां विनाश्य मुनिमधावयत्। अन्ततः अम्बरीषपदाश्रयणेनैव तस्य रक्षा समजायतेति कथा स्मार्यते।

"बिभेमि जनात्" भयार्थकपदप्रयोगे भयहेतुवाचकपदं पञ्चम्यन्तं स्यात्।

[३२] "पाण्डवेभ्यो भृशं भीताः" अत्रापि तथैव।

[३५] "प्रतीक्षन्तः" आत्मनेपदिधातोः शतृप्रत्ययः आर्षः।

[४०] "आपृच्छे" 'आङि नुपृच्छयोः' इत्यात्मनेपदम्।

[४५] धृतराष्ट्रस्यापत्यानि पुमांसः धार्तराष्ट्राः, तैः।

## श्रीनारायणभट्टः ।

[१] ‘ उत्तरेण निलानदीम् ’ एनबन्तेन योगे द्वितीया ।

[२] गव्यूतिः = क्रोशयुगम् ।

[३] ‘ वेदवेदाङ्गादिषु ’ ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः । शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, कल्पम्, ज्योतिषम् इत्येतानि षड् वेदाङ्गानि भवन्ति ।

[४] पण्डा ज्ञानम् अस्य संजाता इति पण्डितः । महान् पण्डितः महापण्डितः ।

[५] इतिहासः = पुरावृत्तम् । “ इतिहासः पुरावृत्तम् ” इत्यमरः ।

[७] गन्तुमिच्छुः जिगमिषुः । सन्नन्तादुप्रत्ययः ।

[८] ‘ प्रातिष्ठत ’ सम्, अव, प्र, वि, एतत्पूर्वकात् स्थाधातोः आत्मनेपदं स्यात् ।

[९] मार्गस्य मध्ये मध्येमार्गम् । मध्यशब्दस्य पूर्वनिपातः एदन्तत्वनिपातश्च ।

[१०] उल्लाघः = नीरोगः । अनुल्लाघं उल्लाघं सम्पद्यमानं कृत्वा उल्लाघीकृत्य ।

[११] पुनः पुनरतिशयेन वा दृश्यते दरीदृश्यते ।

---

## उत्तङ्कस्य गुरुदक्षिणा ।

[१] प्रवासः दूरदेशवासः ।

[२] 'वसति स्म' स्मयोगे भूते लट् ।

[३] अन्यः कालः कालान्तरम्, तेन ।

[४] उपाध्यायस्य स्त्री उपाध्यायानी ।

[५] पुण्यकम् = उपवासादिसहितं कृच्छ्रचान्द्रायणादिसदृशं किञ्चन व्रतम् ।

[६] प्रातिष्ठत, प्रतस्थे, प्रचक्रमे, एतेषाम् आत्मनेपदनियम उक्तः ।

[७] "नमो देवेभ्यः" नमःशब्दयोगे चतुर्थी स्यात् ।

[८] "तमन्वयात्" अनुशब्दयोगे द्वितीया ।

[९] प्रासादैः हर्म्यैः वलभीभिश्च निर्यूहैः च सङ्कुलम् ।

[१०] 'एनम्' अन्वादेशविषये इदमेतदोः एनादेशः । किञ्चित् कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः ।

[११] प्रतिकर्तुमिच्छन् प्रतिचिकीर्षमाणः सन्नन्तम् ।

## कर्णाश्वत्थामविवादः।

[१] बद्धः परिकरः येन स बद्धपरिकरः।
"भवेत् परिकरो व्राते पर्यङ्कपरिवारयोः।
प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि"॥ इति विश्वः।
"यत्नारम्भौ परिकरौ" इति त्रिकाण्डशेषः।

[२] युधिष्ठिरस्य इदं यौधिष्ठिरं बलं यौधिष्ठिरबलम्।

[३] सेनायाः पतिः सेनापतिः तस्य भावः सैनापत्यम्।

[४] अङ्गराजस्य = कर्णस्य। तत्पुरुषसमासान्तभूतानि राजन्, अहन्, सखि, इत्येतानि राज, अह, सख, इति अकारान्तानि स्युः।

[५] "आयुधं गुरुशापेन निर्वीर्यम्"। धनुर्विद्याभ्यासार्थं भार्गवमुपगतः कर्णः स्वस्य क्षत्रियत्वं न व्यज्ञापयत्। कालेन कर्णस्य सत्यस्थितिं विज्ञातवान् भार्गवः कार्यकाले तव "आयुधं निर्वीर्यं भवेत्" इति शशाप इति काचन कथा विद्यते।

[६] "यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना"। द्रोणेन आयुधं पाञ्चालाद् भीत्या एव परित्यक्तमिति कर्णो ब्रवीति।

[७] "पृथासूनुः साक्षी" इत्यनेन "अश्वत्थामा हतः" इति युधिष्ठिरवाक्यं श्रुत्वा पुत्रदुःखेनैव पिता शस्त्रमत्यजदिति सूचितम्।

[८] "मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते"। अर्जुनः "अहमेव कर्णं हन्तास्मि" इति प्रतिज्ञातवान्। तव वधेन तस्य प्रतिज्ञायाः मिथ्यात्वं जनयेयमित्यर्थः।

[९] "शस्त्रग्रहणेनालम्" निषेधार्थकस्य अलमित्यस्य योगे तृतीया स्यात्।

[१०] "स्पृष्टा येन" इत्यादिना द्यूते पराजितानां पाण्डवानां धन्विनां गुरूणां च पुरतः दुःशासनेन कृतौ द्रौपदी-केशग्रहणवस्त्राक्षेपौ, तद्दर्शनकुपितभीमसेनकृतां "दुःशासनं हत्वा तस्य हृदयस्थं रक्तं पिबेयम्" इति प्रतिज्ञाम् च सूचयति।

## पादुकापट्टाभिषेकः ।

[१] "रात्रिमुवास" कालवाचिनोऽत्यन्तसंयोगे द्वितीया ।

[२] परस्मिन्नहनि परेद्यवि ।

[३] अतिशयेन तंद्रु द्रुततरम् ।

[४] अतिशयेन वृद्धः ज्येष्ठः । ज्येष्ठः भ्राता ज्येष्ठभ्राता ।

[५] मुक्तः कण्ठः यस्मिन् कर्मणि तद्यथा तथा ।

[६] "चतुर्दशवर्षाणि वस्तव्यम्" । अत्यन्तसंयोगे द्वितीया ।

[७] 'परिवेत्ता'। 'परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात्' इत्यमरः

[८] "निरालोकः" । प्रत्युपवेशने वस्त्रादिना मुखमाच्छाद्य दर्शनमपि वारयति । एवमेव निरालोकत्वम् ।

---

## कुमारसम्भवः ।

[१] 'विश्' धातोर्लिट् परस्मैपदम्

| | | |
|---|---|---|
| विवेश | विविशतुः | विविशुः |
| विवेशिथ | विविशथुः | विविश |
| विवेश | विविशिव | विविशिम |

कर्मणि–विविशे

---

[२] 'इण्' धातोर्लिट् परस्मैपदम्

| | | |
|---|---|---|
| इयाय | ईयतुः | ईयुः |
| इययिथ / इयेथ | ईयथुः | ईय |
| इयाय / इयय | ईयिव | ईयिम |

कर्मणि—ईये

[३] 'अस्' धातोर्लिङ् परस्मैपदम्

| | | |
|---|---|---|
| स्यात् | स्याताम् | स्युः |
| स्याः | स्यातम् | स्यात |
| स्याम् | स्याव | स्याम |

भावे—भूयेत

[४] 'अस्' धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| अस्ति | स्तः | सन्ति |
| असि | स्थः | स्थ |
| अस्मि | स्वः | स्मः |

भावे—भूयते

[५] 'शक्' धातोर्लिट् परस्मैपदम्

| | | |
|---|---|---|
| शशाक | शेकतुः | शेकुः |
| शेकिथ<br>शशक्थ | शेकथुः | शेक |
| शशाक<br>शशक | शेकिव | शेकिम |

भावे—शेके

[६] 'ब्रू' [वच्] धातोर्लिट् परस्मैपदम्

| | | |
|---|---|---|
| उवाच | ऊचतुः | ऊचुः |
| उवचिथ<br>उवक्थ | ऊचथुः | ऊच |
| उवाच<br>उवच | ऊचिव | ऊचिम |

कर्मणि—ऊचे

[७] 'क्षि' धातोर्लङ् परस्मैपदम्

| | | |
|---|---|---|
| अक्षिणोत् | अक्षिणुताम् | अक्षिण्वन् |
| अक्षिणोः | अक्षिणुतम् | अक्षिणुत |
| अक्षिणवम् | अक्षिणुव<br>अक्षिण्व | अक्षिणुम<br>अक्षिण्म |

कर्मणि—अक्षीयत

[८] ‘ विद् ’ धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| वेत्ति | वित्तः | विदन्ति |
| वेत्सि | वित्थः | वित्थ |
| वेद्मि | विद्वः | विद्मः । |

कर्मणि–विद्यते

[९] ‘ ब्रु ’ धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| आह | आहतुः | आहुः |
| आत्थ | आहथुः | ब्रूथ |
| ब्रवीमि | ब्रूवः | ब्रूमः । |

कर्मणि–उच्यते

आहेति विभक्तिप्रतिरूपकमव्ययमपि वर्तते ।

[१०] ‘ द्विष् ’ धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| द्वेष्टि | द्विष्टः | द्विषन्ति |
| द्वेक्षि | द्विष्टः | द्विष्ट |
| द्वेष्मि | द्विष्वः | द्विष्मः । |

कर्मणि–द्विष्यते

[११] ‘ कृ ’ धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| करोति | कुरुतः | कुर्वन्ति |
| करोषि | कुरुथः | कुरुथ |
| करोमि | कुर्वः | कुर्मः |

कर्मणि–क्रियते

[१२] 'अस्' धातोर्लोट् परस्मैपदम्

| | | |
|---|---|---|
| अस्तु / स्तात् | स्ताम् | सन्तु |
| एधि / स्तात् | स्तम् | स्त |
| असानि | असाव | असाम । |

भावे—भूयताम्

[१३] 'श्रु' [श्रृ] धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| श्रृणोति | श्रृणुतः | श्रृण्वन्ति |
| श्रृणोषि | श्रृणुथः | श्रृणुथ |
| श्रृणोमि | श्रृणुवः / श्रृण्वः | श्रृणुमः / श्रृण्मः |

कर्मणि—श्रूयते ।

[१४] 'या' धातोर्लिट् परस्मैमदम् ।

| | | |
|---|---|---|
| ययौ | ययतुः | ययुः |
| ययिथ / ययाथ | ययथुः | यय |
| ययौ | ययिव | ययिम |

कर्मणि—यये

[१५] उद्+'सृज्' धातोर्लिट् परस्मैपदम्

| | | |
|---|---|---|
| उत्ससर्ज | उत्ससृजतुः | उत्ससृजुः |
| उत्ससर्जिथ / उत्ससृष्ठ | उत्ससृजथुः | उत्ससृज |
| उत्ससर्ज | उत्ससृजिव | उत्ससृजिम। |

कर्मणि–उत्ससृजे

[१६] वि + 'धा' धातोर्लट् आत्मनेपदम्

| | | |
|---|---|---|
| विधत्ते | विदधाते | विदधते |
| विधत्से | विदधाथे | विधध्वे |
| विदधे | विदध्वहे | विदध्महे। |

कर्मणि–विधीयते

## सुभाषितस्थ क्रियारूपाणि

[१] 'कृ' धातोर्लङ् आत्मनेपदम्

| | | |
|---|---|---|
| कुरुते | कुर्वाते | कुर्वते |
| कुरुषे | कुर्वाथे | कुरुध्वे |
| कुर्वे | कुर्वहे | कुर्महे |

कर्मणि–क्रियते

[२] 'प्री' धातोर्लङ् परस्मैपदम्

| | | |
|---|---|---|
| प्रीणाति | प्रीणीतः | प्रीणन्ति |
| प्रीणासि | प्रीणीथः | प्रीणीथ |
| प्रीणामि | प्रीणीवः | प्रीणीमः |

कर्मणि–प्रीयते

[३] ‘स्तु’ धातोर्लोट् परस्मैपदम्

| | | |
|---|---|---|
| स्तौतु / स्तुतात् | स्तुताम् | स्तुवन्तु |
| स्तुहि / स्तुतात् | स्तुतम् | स्तुत |
| स्तवानि | स्तवाव | स्तवाम |

कर्मणि—स्तूयताम्

[४] वि+‘धा’ धातोर्लिङ् आत्मनेपदम्

| | | |
|---|---|---|
| विदधीत | विदधीयाताम् | विदधीरन् |
| विदधीथाः | विदधीयाथाम् | विदधीध्वम् |
| विदधीय | विदधीवहि | विदधीमहि |

कर्मणि—विधीयेत

[५] ‘वृ’ धातोर्लट् आत्मनेपदम्।

| | | |
|---|---|---|
| वृणीते | वृणाते | वृणते |
| वृणीषे | वृणाथे | वृणीध्वे |
| वृणे | वृणीवहे | वृणीमहे |

कर्मणि—व्रियते

[६] 'हा' धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| जहाति | जहितः / जहीतः | जहति |
| जहासि | जहिथः / जहीथः | जहिथ / जहीथ |
| जहामि | जहिवः / जहीवः | जहिमः / जहीमः |

कर्मणि–हीयते

[७] 'मृज्' धातोर्लट् परस्मैपदम्

| | | |
|---|---|---|
| मार्ष्टि | मृष्टः | मृजन्ति |
| मार्क्षि | मृष्टः | मृष्ट |
| मार्ज्मि | मृज्वः | मृज्मः |

कर्मणि–मृज्यते।

[८] 'अश्' धातोर्लट् आत्मनेपदम्

| | | |
|---|---|---|
| अश्नुते | अश्नुवाते | अश्नुवते |
| अश्नुषे | अश्नुवाथे | अश्नुध्वे |
| अश्नुवे | अश्नुवहे | अश्नुमहे |

कर्मणि–अश्यते।

DHARMARAM LIBRARY

BANGALORE-560 029

| Due Date | Due Date | Due Date |
|---|---|---|

## NATIONAL SA

DVK Library
*11010036*
T38 K45

1. Save for your futu

2. Do you save regul
   Plan Savings Ce

3. Use the Post Office Savings Bank for your savings.

4. Your savings total up the Nation's savings.

5. Savings spell prosperity for you and the Country.

6. Is that expenditure really necessary? Save and invest.

7. Your Government needs your savings for your future prosperity.

---

PRINTED BY THE S. G. P. AT THE GOVERNMENT PRESS,
SHORANUR, 1966

# KERALA READER SANSKRIT

(Academic & Sanskrit Schools)

STANDARD X

PRICE : Rs. 1·25

1966

T 38
K 45

Indic Digital Archive Foundation
gpura.org